123/२

123/२

अथ

"विवरणतत्वदीपनम्"।

Vivarana Tatva Deepanam.

123/2

123/2

200

123/2

अथ विवरणतत्वदीपनम्

13

॥ श्रीगणेशाय नमः ॥ ॥ श्रीमद्वल्लभलोद्भूतबोधश्रीलसुरद्रुमं। भजे सततसंतापनिर्वापणविचक्षणं ॥ किमेतत्सूत्रं स्वरू
१ पं लक्षणं प्रतिपादयति उतोपलक्षणं नाद्यः कारणत्वस्य स्वरूपत्वानुपपत्तेः नेतरोपि स्वरूपाद्बहिर्भूततया गमकस्योपल
क्षणत्वात् स्वरूपलक्षणं वाच्यं न च तत्प्रतिपाद्यत्वाद्[illegible]सामञ्जस्यमिति आशंक्याह जगदिति। [illegible]आत्मकत्वं [illegible]मायावि
नः कारणत्वप्रतिपादकत्वादुभयपरत्वमस्येत्यर्थः। [illegible]यथा सा[illegible]पादे नान्यस्य न
इदं [illegible] प्रकृतिप्रत्ययार्थयोरन्यतरस्य [illegible] इति। प्रतीयमानार्थस्य [illegible] वाक्य[illegible] विचारल
क्षणया[illegible]कर्तव्यता परं भाष्यमित्यर्थः। अथ [illegible] कथं शास्त्रं श्रोतव्यमित्यर्थी मि
[illegible]न सिध्यायां [illegible] प्रतिज्ञा ननु सा रीत्या माशंक्य ते ननु ब्रह्मेति। प्र
तिज्ञातं प्रतिपाद्यं न प्रतिज्ञातं [illegible] विचार[illegible]प्रतिज्ञा[illegible]एव प्रतिपाद्य इत्यर्थः। किं तेषां मुखतोऽप्रतिज्ञातत्वमु
तार्थादिति विकल्प्याद्यांगीकारेण द्वितीयं दूषयत्यत आहेति। लक्षणादि विचारस्य प्रतिज्ञामादि[illegible] तस्य साक्षाद्
पत्तिनत्वपंवानामिति। प्राश्य[illegible] शंकते फलमूतयेति विचाराधीनशक्तिनामर्थ ब्रह्मकोत्यज्ञानाधीनाविद्यानि राम
वृत्ति[illegible] विशिष्टतया ब्रह्मस्वरूपस्य फलत्वमित्यर्थः। फलत्वम प्रयोजकमित्याह पूर्ववादीन साधनेति। साधनाद्य १

णावेसाध्यानिष्पत्तेः साधनादेः प्राथम्यमित्यर्थः साध्यस्य साधनाधीनत्वमंगीकृत्य साधनादिविचारस्याफलत्वमि
त्यर्थतः प्राथम्यं दूषयन्नत आहेति । साधनादेः साध्यसिद्धिहेतुत्वात्तस्यैव प्राथम्यं न साध्यस्येत्याशंक्याह ब्रह्म प्रमाण
मिति ब्रह्मसाधनमिति ब्रह्मज्ञानसाधनमित्यर्थः । ब्रह्मफलमिति ब्रह्मज्ञानफलमित्यर्थः । विशिष्टविचारप्रतिपत्ते
र्विशेषणब्रह्मप्रतिपत्तिसापेक्षत्वात्प्राथम्यं स्वरूपनिर्णय इत्यर्थः । स्वरूपनिर्णयस्यापि प्रमाणादिसापेक्षत्वमविशि
ष्टमित्याशंक्याह ब्रह्मस्वरूपेति । प्रमाणादिप्रतिपत्तेर्ब्रह्मप्रतिपत्तिसापेक्षत्वाभावान्निर्विशेषणस्वरूपप्रतिपत्त्याव्यनि
र्णयस्य न युक्त्यादिप्रतिपत्त्यपेक्षत्वमिति विशेषमप्यस्तीत्यर्थः । स्वरूपविचारस्य प्राथम्ये हेत्वन्तरमाह प्राधान्येनेति । प्र
माणादिविचाराणां साध्यत्वमन्यार्थं न तथा ब्रह्मस्वरूपस्येत्यर्थः । पूर्वोत्तरसूत्रयोरुत्थाप्योत्थापकलक्षणः संबं
धइत्याह हेतुमिति । भगवत्पदप्रयोगस्यार्थमाह जिज्ञास्येति । उत्पत्तिं च विनाशं च भूतानामागतिं गतिं । वेत्ति विद्याम
विद्यां च स वाच्यो भगवानिति षड्भगवच्छब्दार्थः । सूत्रस्य स्वरूपपरत्वमाक्षिपति नन्विति । इदमस्य लक्षणमित्यव्या
प्तिपरिहारेण लक्ष्यलक्षणयोरविनाभाव इदमेवानेन लक्ष्यमित्यतिव्याप्तिपरिहारेणेति योजना प्रमाणयुक्त्यभावेऽसि
द्धइत्याह तत्राहेति । युक्तिवदेव प्रमाणमपि लक्षणे निर्णयोपयोगि तत्सूत्रगणं कस्मान्नोक्तमित्यत्राहापेशब्दादिति । प्रमा

व॰ णाद्युक्तौरत्र सूत्रणे उत्तरग्रंथवैयर्थ्यमित्याशंक्याहात्रेति। वेदवाक्यानामन्यपरत्वव्युदासेनब्रह्मण्येव तात्पर्यसम
६१ न्वयार्थः। प्रत्यक्षादिविरोधाद्वेदांतानां ब्रह्मण्यप्रामाण्यमिति शंकायां तद्विरोधनिराकरणमविरोधार्थः। बहुव्री
हिर्द्विविधः तद्गुणसंविज्ञानोऽतद्गुणसंविज्ञानश्चेति तत्राद्यं तद्गुणसंविज्ञानइत्युक्तं आद्यं तस्यार्थमाहविशेषवि
ति। लंबकर्णादिवद तद्इत्यत्र देवदत्तेनैकदे[illegible]विशेषणं कर्णत्वादेर्देवदत्तो बोध्यते स तद्गुणसंविज्ञानइत्यर्थः। अतद्गु
णसंविज्ञानबहुव्रीह्यनंगीकृतौ कोहेतुरित्याशंक्याह [illegible]तद्गुणेति। चित्रा गावो यस्य स चित्रगुरित्युक्ते न
चित्रगवां समासार्थत्वं किंतु देवदत्तस्य तथाचात्रातद्गुणसंविज्ञानस्वीकरणे स्थितिभंगयोः समासार्थत्वेन जन्म
नइत्याप्य येन तथाच जन्मकारणमन्यदिति न [illegible] स्थितिभंगकारणं ब्रह्मसिद्ध्येदित्यर्थः। जन्मास्थितिभि
भंगमित्येकवचनमाक्षिपति नन्वेवमपीति। तद्गुणसंविज्ञानस्वीकारेपीत्यर्थः। द्व्येकयोर्द्विवचनैकवचने इति सूत्रा
त् द्वित्वविवक्षायां द्विवचनं एकत्वविवक्षायामेकवचनमिति न्यायविरोधादेकत्वनिर्देशानुपपत्तिरित्यर्थः। मित्रे
षपितरुषु संहत्युपाधौ वनमित्येकवचनमप्यदेशवद्वापि समाहारोपाधावेकवचनं युक्तमित्यतआह नसमाहारेति। संह राम
तिप्रधानत्वगमकमाहत्वतीयेति। नपुंसकलिंगनिर्देशादित्यर्थः। प्रपंचस्याकोनामादिरित्यत्र किमुत्पत्तिः प्रतिबि २

धृते उत प्राथम्यं आद्ये प्रतिवचनस्यानानुरूपत्वं द्वितीये त्वनुक्तोपालंभ इत्याशंक्यतात्पर्यमाह जन्मादीनामिति । पू
र्वकालकोटिः प्रागभावः तद्रहित आदिर्जन्मवत्तिप्रपंचस्य च पूर्वकालकोटिविहीनत्वात्तत जन्मस्थितिभंगानामप्यतम
स्य प्राथम्यमिति टीकार्थः । जन्मन एव आदित्वमिति च शब्दप्रयोगाद्धेत्वंतरसमुच्चयार्थत्वं लभ्यते न च तथा तस्य
प्रागनिर्दिष्टत्वादित्याशंक्य शंकाव्यावृत्तिश्चशब्दार्थ इत्याह परिहरतीति । श्रौतो निर्देशः श्रुतिनिर्देश इत्यर्थः । श्रुतौ
जन्मन आदित्वनिर्देशोपि सूत्रे तस्यादित्वं कस्मादित्याशंकां परिहरिष्यन्नाह माध्यमिति यतो वेत्यादिवाक्यार्थनि
रूपणायेदं सूत्रं प्रवृत्तं तत्रश्रुतौ जन्मन आदित्वस्य निर्दिष्टत्वात् सूत्रेपि तथाभवितव्यं अन्यथा श्रुतिसूत्रयोरन
नुरूपतापातादिति टीकार्थः । जनित्वास्थित्वान्नश्यतीति न नियंतुं शक्यमिति शाक्यः शंकते न नु सर्वमिति । वि
द्युदादौ स्वसत्तालाभानंतरं विनाशदर्शनादत्रापि तथात्वमिति न जन्मस्थितिभंगानां क्रम इत्यर्थः । प्रत्यभिज्ञा
विरोधान्नैषाशंका समुन्मिषतीत्याह तत्राहेति । अस्येति प्रकृतिप्रत्ययात्मकमेकं पदं तत्र प्रकृत्येदमा प्रत्यक्षादि
सन्निधापितं जगन्निर्दिश्यत इत्युक्तं तदाक्षिपति नान्विदं शब्द इति । अयं घट इत्यादाविदं शब्दस्य पुरोवस्थितवस्तुमा
त्रविषयत्वदर्शनादिदमः सकलजगत्परामर्शित्वमयुक्तमित्यर्थः । सर्वनाम्नः प्रसिद्धवस्तुमात्रपरामर्शित्वं स्व

व- भावः अपवादे त्वन्यथात्वमित्याशयेनाह तस्याहेति। अस्येत्यत्र प्रत्ययस्य संबंधोर्थ इत्युक्तं तदाक्षिपति ननु जन्मा
३ दीनामिति। किं सतो जन्मादिसंबंध उतासतो नाद्यः जन्मनः प्राक्सत्वासंभवात्सतो नाशानुपपत्तेश्च नाप्यसतो
जन्मनाशादिसंबंधः संभवी नृशृंगवन्नापिस्थितिसंबंधः। तस्य भेदादिनाऽनिरूपणादिति चोद्यार्थः। अनिर्वच
नीयत्वादस्मन्मते सर्वोपिसंबंधः संभवीत्याह तदाहेति। लक्षणनिरूपणार्थं सूत्रमित्युक्तं जन्मादिकं लक्षणं उत
तत्कारणत्वं इति विकल्पाद्येपि निरूप्यमित्याह ननु [illegible]नेति। किं ब्रह्मसंबंधिनो जन्मादेर्लक्षकत्वमुतासंबंधि
न इति किंशब्दार्थः। असंबंधित्वे लक्षकत्वम[illegible]प्रसं[illegible]बंधपक्षे दूषयति नतावदिति। जगतो
जन्मादेः स्वतो संभवात्कारणाधीनत्वं वक्तव्यं तत[illegible]लक्षणताश्रयणाज्जन्मादेर्लक्षणत्वनिरसन
मिष्टमित्याह कारणेति कारणत्वस्यापि लक्षणत्वं युक्तं तदित्याह नन्विति। लक्षणांतर्गतमित्युपलक्षणमित्यर्थः
। नतावत्कारणत्वस्य लक्ष्यस्वरूपत्वं सप्रतियोगित्वात्तत्रापि लक्षणांतर्गतत्वं ब्रह्मणो निर्धर्मकत्वादिति काक्का राम
सूच्यते। प्रतिबंधोत्तरं वक्तुं तामाह ननु गृहस्येति। अधिकरणत्वस्य किं स्वरूपत्वं उतोपलक्षणत्वमिति किंश
ब्दार्थः। आद्यमनूद्य दूषयति लक्ष्येइत्यादिना द्वितीयमनुवदति लक्षणेति। तुल्यमुत्तरमित्याह कारणत्वमिति॥

कारणत्वस्य लक्षणांतर्गतत्वमुपपादयति नहीति। क्रियावेशात्मकत्वं क्रियाश्रयत्वमित्यर्थः। कारणत्वस्य न
ब्रह्मलक्षणत्वं तस्य निर्द्धर्मकत्वादित्युक्तमुपसंहारव्याजेन निरस्यति तस्मादिति। आत्मन आकाशः संभूत इत्या
दिना ब्रह्मणः कारणत्वप्रतिपत्तेरित्यर्थः। प्रकारांतरेण लक्षणमाक्षिपति ननु निमित्तेनेति। उपादानकारणस्य
निमित्तकारणाद्भेदेनावस्थानाद्ब्रह्मशब्दस्य स्वार्थान्वयाभावप्रसंगादिति संबंधः। न केवलमुपादानकारणात्पृथ
क्त्वाद्ब्रह्मशब्दार्थासंभवः किंतु कार्यस्यापि पृथग्भावादित्याह जगदिति। द्वितीयं दूषयति नापीति। निमित्तकारणस्य
पृथग्भावेपि ब्रह्मणः सर्वज्ञत्वादिरूपत्वाद्युपदेशसंभवइत्याशंक्याह हेयोपादानेति। पक्षद्वयेपि साधारणं दूष
णमाह सत्यज्ञानमिति। निमित्तत्वेऽनंतमित्यनुपपन्नं स्यादुपादानस्य पृथग्भावत्वात् तथा केवलोपादानेप्यनं
ततानुपपत्तिस्तस्यानिमित्तस्य पृथग्भावात् तथा ज्ञानमिति चानुपपन्नमुपादानस्याचेतनत्वादित्यर्थः। तृती
यं दूषयति नापीति। उभयकारणत्वस्योपलक्षणतया प्रमाणत्वात्तत्र प्रमाणाभावो न दोषायेत्याशंक्याह प्रमा
णांतरेति। प्रमाणांतराधिगतं गंधवत्त्वादिकं पृथिव्यादिकं लक्षयति अन्यथाश्रयासिद्धेरित्यर्थः। तर्हि सिद्धमे
वलक्षणमस्त्वित्याशंक्य किमनुमानतः सिद्धमुतागममात्राद्वेत्याह न तावदिति। घटादौ निमित्तोपादानयोर्भे

त्र.प. दोपलंभात्सपक्षाभावइत्याह दृष्टांतइति। किंभूतभौतिकपक्षीकारेणाभिन्ननिमित्तोपादानत्वं साध्यत्वेऽतभूतमात्रं
४ पक्षीकृत्य नाद्यइत्याह महाभूतेति। निमित्तोपादानदे मयाहि प्रत्यक्षादिविरोधात्रेत्यमनुमानमुदेतीत्यर्थः। किं
वाभिन्ननिमित्तोपादानस्याप्रामाणिकत्वात्तदनुवादेन ब्रह्मप्रतिपादनं इत्याह नतदिति। नद्वितीयइत्याह भू
तेति भूतपंचकस्यकार्यत्वेनाभिन्ननिमित्तोपादानत्वं नानुमेयं भौतिकेषु व्यभिचारादित्यर्थः। नाप्यागमात्तत्सि
द्धिः उभयेकारणत्वसंपादकागमानुपलब्धेरितिदृष्टव्यं। टीकायामुपादानमात्रमुपलक्षणमितिप्रतिभाती
त्याशंक्याह निमित्तस्यापीति। नान्यनिबंधनेति अन्यनिबंधनाश्रेवेत्यर्थः। पंचम्याउपादानार्थत्वे। ननिमित्तार्थ
त्वं निमित्तार्थत्वे नोपादानार्थत्वमित्याशंक्याह। भयत्रेति। जनिकर्तुः प्रकृतिरितिसूत्रे प्रकृतो। हेताविति
निमित्ते नपंचम्याविधानं लक्षणतइत्यर्थः। एकस्यनिमित्तोपादानत्वमप्रसिद्धमितिनलक्षणमित्युक्तं निरस्य
ति भूतेति। सद्रूपत्वनुगममात्रेणकथमेकप्रकृतिकत्वमनुमीयते जीवादौ व्यभिचारादित्याशंक्याह तथाहीति
। महाभूतानिस्वानुगतोपादानानि। भावत्वे सति विकारत्वात् घटादिवदितिविवक्षितं। प्रध्वंसव्यावृत्त्यर्थं भा राम
वत्वेसतीत्युक्तं आत्मव्यावृत्त्यर्थं विकारत्वादिति। विकारत्वेऽपपादयितुं विविधेत्युक्तं। विविधत्वं विभक्तत्वइत्यर्थः ४

किं चतदनुगतमुपादानमितिवीक्षायां सन्नु घटः सन्नु पट इति सदनुरक्ततया घटादेः प्रतीयमानत्वात्सदेवानुगतमुपादान
मित्यभिप्रायेण सद्वस्तु प्रकृतिकानीत्युक्तमाचार्येणेति द्रष्टव्यं। सत्वद्द्रव्यत्वादीनामप्यनुगतानां तत्रोपलंभात्किमत्रोपा
दानमिति नज्ञायते तदर्थमाह द्रव्यत्वादीति। द्रव्यत्वादय एवाभेदाद्द्रव्यत्वाथ भेदाः नमिघत्तद्दत्यभेदाः अनुवृत्तत्वादित्य
र्थः। द्रव्यत्वावांतरजातिः पृथिवीत्वादिरादिशब्दार्थः। द्रव्यत्वादीनामपि विभक्तत्वात्समानाधिकृतत्वोपलंभाच्च नपृथ
गनुगतिर्युज्यते किं तु तदध्यस्ततयेत्यर्थः। सत्तासामान्यस्यापि व्यभिचारित्वादनुपादानत्वमिति शंकां निरस्यति सद्वस्त्वि
ति। सच्छब्देन न परापरमतं सामान्यं विवक्षितं किं तु सद्रूपं संतो गुणाः संति कर्माणि सत्वं सत् विशेषाः संतः सम
मवाय इत्यादिरूपेण सर्वत्र प्रथमानः सच्छब्दार्थः तच्चोपादानमित्यर्थः। भौतिकानां भूतोपादानता यात्र अनुभव
सिद्धत्वात्सद्वस्तु सर्वत्र प्रकृतिरिति कथमुक्तमित्याशंक्य भूतानां सदुपादानतया सदात्मकत्वाद्भौतिकानाम
पि सत्प्रकृतित्वमस्खलितमित्याह भौतिकानामपि। व्यावृत्तस्य कारणत्वकल्पनायां गौरवमितरत्र लाघवमतो
प्येकमेवोपादानमित्याह तदिति। भवत्वेकस्य सकलोपादानत्वं तथापि कथमभिज्ञानमित्युपादानत्वं तत्राह
तस्येति। प्रेक्षापूर्वकारणमस्येति प्रेक्षापूर्वं तेन जनितं वेति प्रेक्षापूर्वजनितं। जनितपदं तु स्पष्टीकरणार्थं। प्रेक्षा

त्व ५ पूर्वत्वमसिद्धमिति शंकां निकर्तुं कार्यत्वादित्युक्तं । घटादिषु व्यभिचारमाशंक्याह नचेति । मृद्देघवस्य चैतन्यस्योपा
५ दानत्वात्कुलालाद्यवस्थचैतन्यस्य निमित्तत्वात्तयोश्चैक्यान्न व्यभिचार इत्यर्थः । सुखाद्युत्पत्तावात्मोपादानम
दृष्टादिनिमित्तं तत्तश्च साध्यविकलो दृष्टान्त इति शंकते अदृष्टादीति । अदृष्टादिलक्षणनिमित्तस्यात्मलक्षणो
पादानाद्भेद इत्यक्षरार्थः । साध्यशब्दार्थो न भिन्नोनवानित्याह नोपादानेति । अभिन्नोपादानाधिष्ठातृत्वस्य
साध्यत्वान्न साध्यवैकल्यमित्यर्थः । अनुमानस्यानिरवद्यतां साधनफलमाह तस्मादिति । न केवलमनुमा
नादुभयकारणत्वसिद्धिः किं तु श्रुतितोपीत्याह स्रष्टपीति । तदात्मानं स्वयमकुरुत बहुस्यां प्रजायेयेत्यादि
वाक्यादुपादानत्वं तदैक्षततेति ईक्षणपूर्वकस्रष्टृत्वश्रवणादधिष्ठातृत्वं च लक्ष्यत इत्येकस्योभयकारणत्वं
सिद्धमित्यर्थः । परिणामिनः क्षीरादेरचेतनत्वदर्शनादुपादानस्याधिष्ठातृत्वं विरुद्धमित्येकदेशिमतमुत्था
पयत्यन्त्रेति । ब्रह्मणः परिणामित्वस्यैवासिद्धेर्न विरोध इत्याह तैरिति । प्रमाणाभावान्न परिणामित्वमित्यर्थः
प्रमाणाभावोसिद्ध इति शंकते सृष्टीति । किं तत्र मुख्यतः परिणामप्रतिपत्तिः उतानुपप[illegible]त्येति विकल्याद्यं राम
प्रत्याह नतत्रेति । द्वितीयमनुवदति सत्यत इति । विवर्त्तव्याहृत्यर्थं सत्यत इति विशेषणं । तदात्मानं स्वयमकु ५

रूतसद्रूपत्वाभावदित्याशयः। श्रुत्यो ब्रह्मणो वस्तुतो जगदापत्तिं कथयंतीत्यर्थः। उदाहृतश्रुतिषु ब्रह्मणोऽन्य
थाभावमात्रं प्रतीयते न वस्तुतोऽन्यथाभावमात्रं च विवर्तपक्षेपि संगछत इत्याह न तास्विति। अथ वर्णप्र
योजकमिति शंकते स्वतइति। वेदांतास्तावत्प्रमाणत्वं च सम्यगनुभवसाधनत्वं ततश्च वेदांतगम्यस्य द्वैतस्य तथाभू
तत्वमाश्रयणीयं इतरथा तेषामप्रामाण्यापातादित्यर्थः। दूषयति किमिदमिति। तथाभूतत्वं नाम किं सत्यत्वं
त्वमाहो स्वोपाधौ नास्तिताविरोधित्वमिति किंशब्दार्थः। आद्यमनुवदति सत्यत्वमिति। प्रमाणगम्यत्वस्य सत्यत्व
व्यभिचारित्वान्नैवमित्याह न मिथ्येति। विशिष्टार्थ इति मिथ्यात्वविशिष्टरजत इत्यर्थः। इतोपि न प्रमाणगम्य
त्वं सत्यत्वमित्याह स्वप्नेति। अथ रथान्रथयोगान्पथः सृजत इति स्वाप्नदृष्टेः श्रौतत्वेपि सत्यत्वाभावादित्यर्थः
द्वितीयमनुवदति स्वोपाधाविति स्वोपाधौ स्वाधिष्ठाने इति यावत्। दृष्टेर्मायाविलासत्वेप्येवंविधसत्यत्वसंभवा
त्परिणामासिद्धिरित्याह मायेति साम्यमेवाह स्वदृष्टेरिति। इतोपि न स्वोपाधौ नास्तिताविरोधित्वं सत्यत्वमित्याह
सर्व इति स्फटिकादिगतारुणिमादयोऽप्यलक्तकाद्युपाधौ नास्तिताविरोधित्वतया सत्याः स्युरित्यर्थः। स्वाश्रयोपा
धाविति स्वाश्रये स्फटिकादिलक्षणे धर्मिणि सति जपाकुसुमलक्षणे न उपाधौ सतीत्यर्थः। नेति नेत्यादिना

त्व प ब्रह्मणि निषिद्धायाः सृष्टेः कथं तत्र नामसत्तास्ति ताविरोधित्वमित्याशंक्याह सृष्टिरपीति। ब्रह्मणो यादृशं सत्वं
६ प्रतिभासविरोधान्न स्वरूपनिषेधो युक्त इत्यर्थः। निषेधक्रते सृष्टेः का गतिरित्याह किं त्विति। ब्रह्मणो यादृशं स
त्वं तादृशसत्वाभावो विषय इत्याह परमार्थेति। सृष्टेः सत्त्वाभावे असद्विषयत्वेन सृष्टिश्रुतेरप्रामाण्यप
त्तिरिति शंकते नन्विति। अरजतं रजततया यद्बोधयति तदप्रामाण्यं न सद्रजतबोधीति प्रसिद्धं तथा च श्रु
तिः सतीं सृष्टिमसत्तया बोधयंत्यप्रमाणं स्यात् न त्वसतीं तथा बोधयंतीत्याशंक्याह प्रमाणेति। अन
धिगतत्वं स्पष्टयति प्रमाणमिति फलितं दर्शयति न चेति। सदसत्वे विना प्रतीतिरेवानुपपन्नेत्याशंक्याह यथे
ति। यदि घटपदेनैव तदस्तित्वं बोध्यते तर्हि घटोस्तीति पौनरुक्त्यं स्यात्। यदि घटपदं नास्तितामेव ब्रूयात्त
दा घटोस्तीति व्याघातः। घटो नास्तीति पौनरुक्त्यं च। तथा च कीर्त्तिः कीर्त्तिना घटोस्तीति न वक्तव्यं सन्नेव हि घटो
यतः। नास्तीति च न वक्तव्यं विरोधात्सदसत्वयोः तथा च घट इति साधारणाकारप्रतिपत्तिवत्सृष्टेरपि तथा राम
प्रतिपत्तिको निवारयेदित्यर्थः। प्रमाणगम्यत्वं न सत्वप्रयोजकं स्वप्नसृष्टेर्व्यभिचारादित्युक्तमयुक्तं ६
तस्या अपि प्रमाणगम्यतया सत्यत्वादिति मन्वानं प्रत्याह न हीति। अथ रथ्यान्रथयोगान् पथः सृजत इ

तिसृष्टेः श्रवणेपि न सत्यत्वं न तत्र रथा इत्यादिवाक्यात्प्रत्यक्षाद्वा बाधादित्यर्थः॥ स्वाप्नसृष्टिश्रुतेः स्वयंज्योतिष्ट्वपरत्वा
त्र सत्यतायां प्रामाण्यमित्याशंक्य तात्पर्यवैधुर्यमत्रापि सममित्याह प्रयोजनेनेति। न केवलं सृष्टेः फलराहित्यं किं
त्वनर्थोपीत्याह अनर्थेति। प्रपंचस्वरूपाभावे कर्मकांडस्य प्रत्यक्षादेश्च प्रामाण्यं न स्यादस्ति च तत्प्रामाण्यमिति सृ
ष्टेः सत्यत्वमित्याशंक्याह न चेति। मीमांसकमतावष्टंभेन प्रामाण्यं समर्थ्यते जगदिति। जगदुत्पत्यादेः श्रुत्यादि
प्रसिद्धत्वान्नित्यत्वमयुक्तं तथा प्रत्यक्षादिप्रामाण्यानुपपत्त्या सृष्टिश्रुतेः सृष्टिपरत्वमित्याशंक्याह सृष्टीति सृ
ष्टिश्रुत्यायः सृष्ट्यवगमः तं विनापि सृष्टेः सिद्धत्वात् न तत्र शुद्धस्य प्रामाण्यमित्यर्थः॥ सृष्टेरन्यतः सिद्धत्वाद्यथा
न शास्त्रप्रतिपाद्यत्वं तद्वद्भेदस्यापीति शंकते अभेदस्यापीति। प्रमेयत्वमादिशब्दार्थः सोपहासमुत्तरमाह केय
मिति। व्याकुलतामेवाह नहीति। अध्ययनविध्युपात्ततया सृष्टिश्रुतेरानर्थक्यासंभवात्परमार्थविषयत्ववक्त
व्यमित्याह किं तर्हीति परमार्थप्रपंचविषयत्वं विनापि सृष्टिश्रुतेः साफल्यमित्याह प्रत्यक्षादीति। सृष्टिश्रुतेरद्वि
तीयसिद्धिः प्रयोजनमिति संबंधः॥ अद्वैतश्रुत्यैवतत्सिद्धेः किं सृष्टिश्रुत्येत्याशंक्याह प्रमाणांतरेति। सृष्टिश्रुतेर्वि
रोधनिरासद्वारेण तत्प्रयोजनत्वमितरस्य तु साक्षादित्यर्थः॥ विरोधशंकायां तन्निरासः स एव कथमित्यत्राह प्रत्यक्षादी

...त्वप ति। कथं तर्हि विरोधनिरासस्तत्राह मिथ्यात्वेति मिथ्यात्वापादनं वा कथमित्यत्राह ब्रह्मण्येवेति। यतो वेत्यादिना वाक्येन
७ जगदुत्पत्तिविनाशानां ब्रह्मतंत्रत्वं तावत्प्रतीयते तथा मृद्व्यतिरेकेण घटासत्त्ववत् ब्रह्मव्यतिरेकेण न जगत्स्यात्तच्च तत
त्रापि तत्स्यात् कूटस्थासंगस्वरूपविरोधात् तत्तश्च प्रतिपन्नोपाधौ निषेधप्रतियोगित्वाज्जगतो मिथ्यात्वमित्यर्थः। अ
द्वितीयसिद्धिस्तत्त्वयोजनमित्यत्र किं गमकं तत्राह तेनेति। उपक्रमोपसंहारपर्यालोचनया स्पष्टिश्रुतेरद्वैतश्रु
त्येकवाक्यत्वात् तत्फलमेव फलमित्यर्थः। अवत्वेकवाक्यत्वं परमार्थविषयत्वं च तत्राह हानयथेति। परमार्थविषय
त्वेऽद्वैतप्रमित्यनुपपत्तेर्मिथ्याविषयत्वमित्यर्थः। स्पष्टेराभासत्वे सति रजतावभासवत्तद्विषयत्वे श्रुत्युत्थज्ञानस्या
प्रामाण्यमिति शंकते स्पष्टीति किमसुख्यमात्रमाभासत्वमुत मिथ्यात्वं नाद्य इत्याह नसत्येति। नापि द्वितीयः स्व
प्नसंजातकामिनीदर्शनवत्प्रामाण्यसंभवादित्यर्थः। प्रपंचस्यासत्यत्वे सच्च त्यच्चेति सद्भाववचनमिदं सर्वमसृज
तेति स्पष्टिवचनं वानुपपन्नं स्यादित्याशंक्य तयोरन्यथासिद्धिमाह देवदत्त इति स्पष्टिश्रुतौ सत्यशब्दाश्रवणव
न्मिथ्याशब्दस्याश्रवणात्तन्मिथ्यात्वमपीति शंकते कुतः पुनरिति। श्रुत्यंतरपर्यालोचनया प्रपंचमिथ्यात्वप्र राम
तिपत्तेः स्पष्टिश्रुतिरसत्यविषयाध्यवसीयत इत्याह नासदिति। कारणस्य मिथ्यात्वेपि जगति किमायातमित्यत्रा ७

हतदात्मकत्वादिति।कारणत्वेननिर्दिष्टतमसोज्ञाननिवर्त्याविद्यासामानाधिकरण्यादपिमिथ्यात्वमित्याहतमइ
ति।तमोमोहादिशब्दैरविद्याऽस्मितारागद्वेषाभिनिवेशाःक्लेशाःसंगृह्यन्ते।तमसःकारणत्वंक्वचित्क्वचिद
विद्यादेरितिकारणत्वेलक्षणमित्याशंक्याहतमोविद्येति।मिथ्यात्वेप्रमाणसद्भावासत्यत्वेतदभावाच्चपरिणामसि
द्धिरित्युपसंहरतितदेवमिति।नकेवलंमिथ्यात्वेश्रुतिःप्रमाणंकिंतुप्रत्यक्षंचेत्याहतथाचेति।अस्यार्थएवोपाधिरस्यार्थो
पाधिस्तस्मिन्नित्यर्थः।प्रतिपन्नोपाधौनिषेध्यत्वंमिथ्यात्वंतच्चघटेप्यस्तिसत्वोपाधौप्रतिपन्नस्यतस्मिन्निषेधादिदमि
प्रतिपन्नरजतस्यतत्रनिषेधवदित्यर्थः।एकदेशकालसंसर्गितयाप्रतिपन्नस्यघटस्यदेशकालांतरसंसर्गोनिषिध्य
तेनस्वरूपमित्याशंक्याहदेशकालयोरिति।देशोनास्तिकालोनास्तीत्ययंप्रतिषेधः।किंदेशकालाद्युपाधौअस्य
र्थोपाधौवानाद्यः।देशाद्यंतराभावात्नचतत्राप्युपाधिविशिष्टतयाभेदसंभवइत्यपिशंक्यं।उपाधिनिषेधेप्यस्य
न्यायस्यसाम्यात्तदुपाध्यंतरकल्पनायांचानवस्थास्यादित्यर्थः।निरुपाधिकनिषेधादितिदेशाद्यनुपहितास्य
र्थेनिषेधादित्यर्थः।द्वितीयेदेशादेर्मिथ्यात्वंस्यादित्यर्थः।रजतनिषेधोनंतरकालमित्ययुक्तिरितीदमःप्रतिपत्ति
रिदमिनिषेधोयुक्तः।नचतथाघटनिषेधोनंतरकालमस्यार्थोपाधिरितिसोपिनिषेध्यइत्याशंक्याहास्यार्थस्येति

तत्व निषेधाभावे हेतुमाहानुयायिन इति। भवत्वस्त्वपर्थे निषेधस्तथापि कथं ब्रह्मणि निषेधस्तत्राह तादृ इति। तावे
८ वोपाधीयेषां ते तदुपाधयः ते च द्वष्टाष्विति तदुपाधिद्वष्टास्तेषामित्यर्थः। उक्तन्यायमन्यत्रातिदिशति एवमिति
अभावस्य षष्ठप्रमाणगम्यत्वात्कथं प्रत्यक्षत्वमित्याशंक्य धर्मिणः प्रत्यक्षतया तद्विशेषणत्वेनाभावोपि
प्रत्यक्ष इति तार्किकमतमनुसृत्याहान्यथाभावेपि। सर्वे विकारा इति विमता इत्यर्थः। परिकल्पिता इत्युक्ते शून्यवा
दिनः सिद्धसाध्यता तदर्थं वस्तुनीत्युक्तं। व्यावृत्तज्ञानेषु विषयस्य कल्पितत्वांगीकारादिदं प्रत्याह एकस्मि
न्निति। एतावतुक्ते एकस्मिन्कस्मिंश्चित्परिकल्पिततया सति परिकल्पितत्वासिद्धिस्तदर्थं स्वानुस्यूत इति प्रत्येकं
मेकस्वभावानुविद्धत्वाद्धि भक्तत्वान्वेतुद्वयं। वनस्वभावानुविद्धतरुव्यावृत्त्यर्थं प्रत्येकमिति विशेषणं न हि प्रत्ये
कं तरुषु वनमिति मतिः किं तु मीलितेष्वेवेत्यर्थः। विभक्तत्वं च धर्मसत्तासमानसत्ताकभेदवत्त्वमित्यर्थः। चंद्रभे
दवदिति चंद्रविशेषवदित्यर्थः। तत्रैव हेत्वंतरमाह जडत्वादिति। भेदि मिथ्यात्वमभिधाय भेदमिथ्यात्वे हेतुमाह राम
भेदवादिति। हेत्वंतरमाह प्रतिपन्नेति। विमतं मिथ्या प्रतिपन्नोपाधौ प्रतिषिध्यमानत्वाद्देहात्मवत्। असिद्धिं ८
निरस्यत्यस्थूलेति। अहं मनुष्य इत्यहंप्रत्ययालंबने प्रतिपन्नस्य देहात्मभावस्य नाहं मनुष्य इति तत्रैव निषे

धातनसाधनं वैकल्पमित्यर्थः। अनुमानांतरमाह विरोधीति। विमतं सदसद्विलक्षणं विवर्तत्वात् मायाव्याघ्रादिभाववद्
द् इति विवक्षितं हेतुस्वरूपं च विरोधीत्यनेन ग्रंथेन विवृतमित्यर्थः। प्रलयगामीकारवादिनां प्रत्यनुमानांतरमाह प्रलये
ति। स्वोपाधौ शून्यत्वं समर्थ्यते प्रलयावस्थायामिति। अत्र च कार्यमात्रं धर्मि अन्यथा अन्यतरासिद्धिप्रसंगात् कथं
तर्हि काले निषेध इत्याशंक्याह सहकालेनेति। अविद्यावस्थायां कालसत्त्वेपि तन्निवृत्तौ निवृत्तिरित्यर्थः। अर्थापत्तिं प्र
माणयति अर्थापत्तिरपीति। अर्थापत्तिरपि मिथ्यात्वे प्रमाणमित्यनुषंगः। तामेवाह प्रपंचेति। मिथ्यात्वमंतरेणानु
पपत्तौ तन्म विनाशो मिथ्यात्वं गमयतीत्यर्थः। अन्यथोपपत्तिं निरस्यति मिथ्येति। प्रत्यक्षानुमानागमार्थापत्ति
भिः प्रपंचो मिथ्येत्युक्तं तत्र ज्ञानत्वाविशेषात् प्रपंचज्ञानवद् ब्रह्मज्ञानस्य मिथ्यात्वमापतेदित्याशंक्याह नचेति। किंत
स्य स्वरूपमिथ्यात्वं साध्यते उत विषयमिथ्यात्वमाद्ये प्यागंतुकज्ञानं धर्मित्वानागंतुकं आद्यस्त्वंगीक्रियत इत्यभि
प्रेत्य परिशिष्टपक्षद्वयं प्रतिक्षिपति तत्सत्यमिति तद्ब्रह्म सत्यमवितथस्वरूपं। आत्मान्यत्वात् घटादिवद्वैतथ्यशं
कां निरस्यति सत्यात्मेति। अस्थूलादिवाक्ये न प्रपंचो निषिध्यत इत्युक्तमयुक्तं तस्यास्थूलादिव्यतिरेकप्रतिपादन
परत्वादित्याशंक्याह नचेति। किमात्मप्रतिकान्यत्वं प्रतिपाद्यते उत कथंचिदितीति विकल्पाद्यं प्रत्याह कार्येति। द्वितीयं

तत्व॰ प्रत्याहयथेति एवं विभ्रमोपि प्रतिषेध्यः क्वचिद्दृष्टप तद् इत्याशंक्याह तथा चेति तर्ककुशलैरनेकैर्नोत्प्रेक्षितमप्यपरेणाभा
९ सीक्रियते तत्तस्य मिथ्यात्वानुमानस्याप्रामाण्यमिति शंकते तर्केति। किं तर्कमात्रस्याप्रतिष्ठितत्वमुत तर्कविशेष
स्य तत्र द्वितीयांगीकारेण घं दूषयति न विचारेति। न तर्कं दर्शयितुं विचारशास्त्रं प्रवृत्तं किंतु परोत्प्रेक्षिततर्काणां श्र
द्वैतश्रुतिविरोधादाभासत्वद्योतनायेति शंकते शब्देति। तर्कमंतरेण श्रुत्यर्थव्यवस्थासंभवात्तर्कोपि वक्तव्य
इत्याह तर्हीति। सदसत्वेप कस्य विरुद्धे इत्याशंक्याह श्रुत्यर्थस्येति। श्रौतेर्थे विरोधशंकाया एवानुदयादित्य
र्थः। सदसत्त्वप्रसंजनमिष्टमिति शंकते सर्वेति। अस्मिन्नु पक्षे विरोधनिराकरणं निष्फलं स्यादित्याह न ब्रह्म
णीति तर्कमंतरेणाप्यर्थसिद्ध्यंगीकारे ब्रह्मण आत्यंतिकासत्त्वं प्रसज्येतेत्याह तत एवेति। प्रकृतमुपसंहर
ति तस्मादिति। विवर्त्त एवेति सिद्धमित्यन्वयः। इतिपदपरामृष्टं हेतुमाह प्रपंचेति। ब्रह्मणः कूटस्थत्वादपि न
तात्त्विकपरिणामसिद्धिरित्याह प्रशांतत्वादिति। फलविधुरत्वादपि न तस्य सत्यत्वं प्रतिपाद्यमित्युक्तं स्मारयति
निष्प्रयोजनेनेति विवर्त्तशब्दे न विवर्त्तविषयत्वं विवक्षितमिति द्रष्टव्यं स्वरूपलक्षणं कथयितुमस्य जगत इत्यादि राम
भाष्यमित्युक्तं तदनुपपन्नं उक्तस्यैव लक्षणतास्य तत्र प्रतिपन्नेरित्याशंक्याह लक्षणमित्यतीति। जगत्कारणत्वस्य लक्ष्य ९

णत्वासंभवात्तदनुवादो व्यर्थ इति शंकते नन्विति। किमेतत्स्वरूपलक्षणमुतोपलक्षणमिति विकल्प्याद्यं दूषयति नन्ता
वदिति। प्रपंचोपाधित्वादिति प्रपंचसापेक्षत्वादित्यर्थः। भवतु कारणत्वस्य सापेक्षत्वं तथापि कथं न विशेषलक्षणत्वं
तत्राह हनि रूपाधीति। तटस्थलक्षणस्य सत्यत्वे लक्षकत्वानुपपत्तिः लक्ष्यलक्षणयोः परस्परव्यावृत्तात्लक्षणस्यासत्यत्वे
वाष्पादिवद्गमकत्वानुपपत्तिरित्यर्थः। ननु तस्माज्जगज्जन्मादिकारणत्वमुपलक्षणमित्यत्रोपलक्षणमित्युक्तत्वाद्वि
कल्पतद्दूषणानुपपत्तिरिति चेन्मैवं उपलक्षणपक्षस्यापि सावद्यत्वं दर्शयितुं पुनर्विकल्पादेः संभवादिति दृष्टव्यं कार
णत्वस्य सत्यत्वे असत्यत्वे चोपलक्षणतानुपपत्तिरिति यन्नूक्तं। तत्राहोपलक्षणत्वे चेति। विरोध इत्यत्रासत्यत्वादित्यनु
षंगः। असत्यत्वे कारणत्वस्य लक्षकत्वं न संभवति असत्यलक्षकत्वादृष्टेरिति शंकां निरस्यति यद्रजतमिति। यद्रजतमि
त्यभादित्यत्र पुरोवर्तिद्रव्यस्य रजततया भावमेव सत्यं शुक्तिलक्षणं न रजतत्वमित्याशंक्याह साधारणेति। न च संबंधः
सत्यत्वं चेत्युभयमपि प्रयोजकमिति शंक्यं संबंधे सति सत्यत्वाभावाव्यवधानेनालक्षकत्वादृष्टेः। ज्ञानं लक्षकमित्येतच्च
निरूपणीयं ज्ञानमात्रं लक्षकमुतार्थविशेषितं नाद्यः अतिप्रसक्तेः द्वितीये मिथ्याभूतस्य लक्षकत्वसिद्धिरित्यर्थः
। अचेतनकर्तृकत्वव्यासेधार्थं नामरूपाभ्यां व्याकृतस्येत्युक्तं भाष्यकृता तस्यायमर्थः। द्वराद्याक्रिया यो नामरूप

तत्वप गर्भविकल्पपूर्विकायादृष्टत्वाज्जाग्रद्दशाक्रियायामपि तथात्वं कल्प्यत इति चेतन भावकर्तृकत्वमास्थेयमिति।नामरूपाभ्या
१० मितिविशेषणं परकीयप्रक्रियानिरासार्थमित्युक्तं कासौ परकीयप्रक्रियेति शंकायामाह कार्यप्रपंचमिति।नामरूपक
र्मात्मकमित्यत्र नामरूपशब्दाभ्यांशब्दार्थौ कथ्येते।तयोः संबंधः कर्मशब्दार्थः।गुणवद्द्रव्यं।सामान्यवानचलना
त्मकः समवायिकारणताविधुरो गुणः।संयोगविभागयोरनपेक्षकारणं कर्म।नित्यमेकमनेकसमवेतं सामान्यमि
ति चत्वारि तत्त्वानि वार्त्तिककारीयाणां।कार्यं महदादि।कारणमीश्वरः।योगः समाधिः।विधिस्त्रिषवणस्नानादिः।दुः
खांतो मोक्षः।नित्येद्रृवद्रव्येष्ववर्त्तन्तपवयेतं त्याविशेषाः।नित्यः संबंधः समवायः।जीवश्चेतनः।अजीवश्चाचेतनः
परमाण्वादि।ज्ञानोत्पादनद्वारा पुरुषं विषये आस्रवयतीतीन्द्रियप्रवृत्तिरास्रवः।इंद्रियप्रवृत्तिं संवृणोतीति शम
दमलक्षणा प्रवृत्तिः संवरः।नितरां जरयति कल्मषमिति तप्तशिलारोहणादि निर्जरः।बंधः कर्म।मोक्षः सततोर्ध्वग
मनं।पारतंत्र्यं समवायः।प्रमासाधनं प्रमाणं।प्रमाविषयः प्रमेयं।अनवधारणं ज्ञानं संशयः।उद्देश्यं प्रयोज
नं।व्याप्तिवेदनस्थानं दृष्टांतः।प्रामाणिकत्वेनाभ्युपगमः सिद्धांतः।अवयवाः प्रतिज्ञादयः।व्याप्तिबलादनिष्टप्रसं राम
जकस्तर्कः।तर्कपूर्वकस्तत्त्वाध्यवसायो निर्णयः।वीतरागकथा वादः।प्रत्येकसाधनवती विजिगीषुकथा जल्पः। १०

स्वपक्षस्थापनविधुरा विजिगीषुकथा वितंडा। अहेतवो हेतुवदवभासमानाः हेत्वाभासाः। विपरीतार्थकल्पनोपपत्त्या
वचनविघातकं छलं। स्वव्याघातकमुत्तरं जातिः। कथकाशक्तिसूचकं निग्रहस्थानं। ज्ञानेन्द्रियं त्वक्चक्षुर्नासिका
जिह्वाश्रोत्रलक्षणं। कर्मेन्द्रियं वाक्पाणिपादपायूपस्थाख्यं। तन्मात्राशब्देन शब्दस्पर्शरूपरसगंधाः कथ्यन्ते। महाभू
तानि पृथिव्यादीनि। महत्प्रकृतेराद्यं कर्म। अव्यक्तं प्रकृतिः। पुरुष आत्मा कस्तर्हि प्रामाणिकः पक्ष इत्याह कस्तर्हीति।
तं नामरूपाभ्यामेव व्याक्रियत इति श्रुत्यनुसारित्वात् नामरूपात्मकं तत्त्वमित्याह तदाहेति कर्मशब्दाभिधेयस्य शब्दार्थ
संबंधस्य संबंधितद्भावमंगीकृत्य नामरूपाभ्यामित्युक्तं। उत्पद्यमानस्याभिधेयत्वाद्रूपात्मनोत्पत्तिमंगीकृत्य नामा
त्मना उत्पत्तिमाक्षिपति। यद्यपीति। तृतीयार्थमाह इत्थंभूमिति। अथवेत्थंभूतमिति ईदृशमित्यर्थः। नामात्मनोत्प
त्तौ प्रमाणाभावादिति द्रष्टव्यं। आधुनिकस्य कार्यस्य च नामगर्भविकल्पव्याकृतिपूर्वकत्वेप्याद्ये कार्ये कथं तत्सिध्य
तीत्याशंक्याहाद्यमर्थ इति। विकल्पितमिति विशेषितमित्यर्थः। कारणत्वं तटस्थलक्षणमित्यंगीकृत्य स्वरूपपक्षमा
क्षिपति नन्विति। किं सर्वशक्तित्वं स्वरूपलक्षणं उत सर्वज्ञत्वं अथवोभयत्वं इति किंशब्दार्थः। स्वरूपलक्षणापेक्षा
यां तज्जिज्ञासास्यात्सैव कुत इत्याशंक्याह न चेति। तद्धुपलक्षणमेव स्वरूपलक्षणमित्याशंक्याह न च यत्रेति॥

तत्व५ चंद्रस्वरूपप्रतिपत्त्यभावे उपलक्षणे वापि तत्प्रतिप्रत्यक्षदर्शनादित्यर्थः। एवं प्रथमप्राप्तिमभिधायाद्यं दूषयति न ताव
११ दिति। द्वितीयमुत्थाप्य दूषयति सर्वज्ञत्वमिति। सर्वोपाधिकत्वादिति सर्वापेक्षधर्मित्वात्सार्वज्ञस्येत्यर्थः। तृतीयो पि
तेनापास्तः। इतोपि न सार्वज्ञं स्वरूपलक्षणमित्याह कथं चेति। किं षड्भिः प्रमाणैः सर्वं जानातीति सर्वज्ञ उत प्रत्यक्षे
णैनाद्य इत्याह न तावदिति किं युगपत्प्रत्यक्षादिना जानाति उत क्रमेण जानाति नाद्य इत्याह तेषामिति। अचिंत्य
ज्ञ५ महिम्नीश्वरे प्रत्यक्षादीनां युगपत्प्रवृत्तिमाशंक्याह सर्वस्येति। क्रमपक्षं दूषयति सत्त्वपीति। किं विप्रत्यक्षेण जाना
ति किं विल्लिंगेन किं चिदितरेणेत्येवं प्रत्यक्षादिप्रवृत्त्यावपि न यथास्माकं सार्वज्ञं तथैश्वरस्यापीत्यर्थः। प्रत्यक्षेणे
श्वरो जानातीत्यत्रापि विकल्प्य किं वाह्येन प्रत्यक्षेण सर्वं जानाति सतांतरेणाहोसाक्षिणेति तत्राद्यस्तावदसंगत इ
त्याहेंद्रियाणामिति। ईश्वरस्य सर्वसन्निहितं किंचित्संयोगेन किंचित्संयुक्तसमवायेन किंचिदन्यथेत्याशंक्याह सं
युक्तेति। द्वितीयं प्रत्याह मानसमिति। आत्मनस्तद्धर्मस्य चान्यत्रेत्यर्थः। वहिः परतंत्रं मनोन्यथास्माकमपि तेन सर्वं राम
दर्शितं स्यादित्यर्थः। इंद्रियमात्रस्य विप्रकृष्टार्थाग्राहित्वे पि विशिष्टस्येंद्रियस्य विप्रकृष्टग्राहित्वमुचितमित्याशं ११
क्याह न चेति। तथा चोक्तं। यत्राप्यतिशयो दृष्टः स स्वार्थानतिलंघनात्॥ दूरसूक्ष्मादिदृष्टौ स्यान्न रूपे श्रोत्रवृत्तितेति॥

किंचसहकारिवशादपि नेश्वरस्याशेषग्रहणं धर्मलक्षणसहकार्यभावादित्यभिसंधिः। अस्मच्चक्षुरालोकसहकृ
तस्यैव रूपग्रहणयोग्यत्वेपि मार्जारादिचक्षुष आलोकनिरपेक्षस्य यथा रूपग्राहकत्वं तथास्मदयोग्यमीश्वरो जानाति
त्याशंक्याह मार्जारेति। अखिलपरिभावनासंस्कारसहकृतं मनः सर्वग्राहकमित्याशंक्याह नचेति। भावनापि किं ज्ञा
तेउताज्ञाते नतावदज्ञात इत्याह प्रथममिति। आद्यं प्रत्याह परिभावनाया इति। इतोपि न कृत्स्नपरिभावना इत्याहाती
तेति। अनवधारणमेवाह हेतावदिति। अनवधारणादिति अवधारणयोग्यताभावादित्यर्थः। द्वितीयं दूषयति न
चेति। प्रदीपः स्वसंसृष्टं यथा ग्राहयति न भविष्यदादि तथात्मस्वरूपस्यापि वर्त्तमानमात्रसंसर्गित्वात्तद्ग्राहित्वमि
त्यर्थः। वाह्येन्द्रियेण मनसा वा ब्रह्मणः सर्वदर्शित्वं यद्यपि न घटते तथापि स्वरूपज्ञानेन सर्वदर्शित्वं घटत इत्याह सि
द्धांतीऽच्यत इति। स्वरूपज्ञानस्य संसृष्टवर्त्तमानमात्रग्राहित्वात्सर्वग्राहित्वमित्युक्तं निरस्यति सर्व[illegible]येति। चैतन्योपाधि
भूताखंडसत्वप्रधाना मायावर्त्तमानसकलविषयाकारेण परिणमते तस्मिंश्च परिणामे प्रतिबिंबितं चैतन्यं सर्वं पश्यत्या
ध्यासिकसंबंधात् ततश्च वर्त्तमानसकलविषयज्ञत्वं सिद्धमित्यर्थः। नन्वेवमप्यतीतविषयज्ञानाभावात् कथं सर्वदर्शि
त्वं तत्राह एवमिति। स्मृतिमूलत्वेनाभिमताभवस्य नित्यत्वात् कथं तत्संस्कारोत्थस्मृत्युपपत्तिरित्याशंक्याह स्वमायेति स्वमा

तत्व॰ याया: परिमाणः स्वमायापरिणामः स उपाधिर्यस्याः सा तथोक्ता मायापरिणामप्रतिबिंबितचैतन्यं स्मृतिशब्देनाभिलप्य
१२ ते वर्त्तमानकाले मायापरिणामावच्छिन्नचैतन्यस्य विषयसाधकत्वात्परिणामः नाशे तदवच्छिन्नचैतन्यस्यापि नाशात् सं
स्कारसहकृतमायातीतविषयाकारेण परिणमते तस्मिन्परिणामे प्रतिबिंबितं चैतन्यं सर्वं पश्यतीति सर्वदर्शित्वमित्य
र्थः। अस्मदादिष्वनुभूतविषयस्य नियमेनानुपलब्धिवत् अनुपलब्धिमाशंक्याह नानुभूतेति। असंप्रमोषे हेतुमाह नावर
णेति। पश्यत्यचक्षुः स शृणोत्यकर्णः स्वाभाविकी ज्ञानबलक्रिया चेत्याद्यागमाद् नावरणज्ञानत्वं निश्चीयत इत्यर्थः।
ज्ञ आगमान्सर्वविषयत्वमुपपादयति तथेति। ननु संभावनामात्रमेतत् न च प्रमाणं पश्याम इत्याशंक्याह। यः सर्वज्ञः
सर्वविदिति। सामान्यरूपेण सर्वज्ञत्वं विशेषरूपेण सर्ववित्त्वं सर्वज्ञत्वस्य सप्रतियोगिकत्वात्स्वरूपत्वमित्युक्तमनु
वदति ननु सोपाधिकेति। सोपाधिकत्वमसिद्धमित्याह नानेनेति। अनेन सर्वज्ञत्वशब्देन ज्ञप्तिमात्रं विवक्षितमिति
संबंधः। कर्तृत्वमत्रोपचरितं न मुख्यमित्याह मात्रमिति। सप्रतियोगिकत्वं निरस्यत्यविषयेति प्रकाशस्य स्वभावत्वे
पि यथा सविता प्रकाशत इति व्यपदेशः तद्वदित्यभिप्रायेणाह आदित्यादीति। ज्ञप्तेर्निष्प्रतियोगिकत्वे कथं सकलद राम
र्शित्वं तत्राह सर्वेति। ज्ञप्तिर्ज्ञानमिति व्युत्पत्त्यंगीकारात् न ज्ञानं सप्रतियोगिकं यद्यपि तथापि विषयस्य स्वसर्गे १२

भासकमादित्यादिवत्ततः सकलदर्शित्वामित्युभानंयुक्तमित्यर्थः। आनंदस्यापि स्वरूपत्वात्कथं स्वरूपद्वयमित्या
शंक्याह विज्ञानमिति। आनंदज्ञानयोरभेदान्न स्वरूपद्वयप्रसक्तिरित्यर्थः। अथवा सर्वज्ञशब्देनाविषयोपाधि
कं यद्विज्ञानं तदेवास्य स्वरूपलक्षणं विवक्षितमिति संबंधः ज्ञायतेऽनेनेति ज्ञानस्य सप्रतियोगित्वप्रतिपत्तेर्न स्वरूपत्वमि
त्याशंक्य करणव्युत्पत्त्यनंगीकरणान्नैवमित्याह विज्ञप्तीति। षण्णां विकाराणां न सूत्रे ग्रहणं युक्तं तन्मूलश्रुते
तेषामप्रतिपत्तेरित्याशंक्य श्रुतिमूलत्वमसिद्धमित्याह ननु निरुक्तेति स्थिते जन्मोत्तरकालत्वात्कथं जगत्स्थि
तिकाले जन्मादिसंभावनाभाष्योक्तेत्याशंकायामुक्तं पृथिवीति जन्मादित्वादितत्र भौतिकवस्तूनामपि जन्मादिसंभा
वात्तद्धेतुत्वेन ब्रह्मकल्पनेत्याशंक्य भूतमात्रकारणत्वेन तत्कल्पनं ततो भयकारणत्वेनोभयथाप्यसंभव इति दर्शय
ति। यास्कपरिपठितानामिति सूत्रमूलं यास्कवाक्यं यदनुमानादिमूलमिष्यते तदेवास्य सूत्रस्य मूलमस्तु किम
नुमानादिमूलनिरुक्तवाक्यस्य मूलत्वकल्पनयेत्यर्थः। तस्मादाद्यः परिशिष्यत इत्याह तत्रेति। भूतानामपि विका
रसंभवात्तदधिगमोपि प्रत्यक्षेण किं न स्यादित्यत्राह न महाभूतेति अपंचीकृतभूतानामतींद्रियत्वात्तद्विकारा
श्रास्मिन्प्रत्यक्षतां भजेरन्नित्यर्थः। तर्हि प्रत्यक्षयोग्यविकाराणामेव ग्रहणं तत्राह तत्रेति। भूतोत्पत्त्यादीनां प्रत्यक्ष

येऽपत्वात्कथं तन्मतेऽपि तत्कारणविषयसूत्रप्रमाणत्वमित्याशंक्याह श्रुताविति ॥ अस्मिन्मते सूत्रमूलायाः
तत्व ५ यास्कवाक्यमूलत्वे हेत्वंतरमाह किंचेति । किं सर्वेषां सूत्राणां या
१३ श्रुतेरपौरुषेयत्वादनपेक्षत्वमित्यर्थः । सूत्रस्य यास्कवाक्यमूलत्वे हेत्वंतरमाह किंचेति । किं सर्वेषां सूत्राणां या
स्कवाक्यमूलत्वमुतास्यैव नाद्य इत्याह श्रुत्यर्थेति । उत्तरसूत्रेषु श्रुतिवाक्यानामेवोदाहृतत्वाविचार्यमाणत्वा
त्तन्मूलत्वमित्यर्थः । द्वितीयं दूषयति श्रुतिरेवेति । श्रुतेरपेक्षत्वात्तन्मूलत्वात्तन्मूलकाल्पनायामैकरूप्यं इतरथा
कस्यचित्सापेक्षत्वं कस्यचिदन्यथात्वमिति वैरूप्यं स्यादित्यर्थः । उपलक्षणस्याप्यतिव्याप्तिं शंकते नन्विति । अभि
न्ननिमित्तोपादानस्य ब्रह्मलक्षणत्वान्मायायाश्चाधिष्ठातृत्वाभावात्कथमतिव्याप्तिरित्यपि न वाच्यं उपा
दानत्वमात्रं लक्षणमित्याशयेनातिव्याप्तेः शंक्यमानत्वादित्यर्थः । मूलकारणत्वमेव कथं मायायास्तत्राह मा
यां त्विति प्रकृतिशब्दोऽन्यथापि घटत इति शंकते प्रक्रियत इति रूढिर्योगमपहरतीति न्यायविरोधान्न योग
वृत्तिराश्रयणीयेत्याह न प्रकृतीति रूढिर्योगमपहरतीत्युत्सर्गः अपवादात्त्वन्यथात्वमिति शंकते आत्मन इति राम
निरपेक्षप्रकृतित्वयानुपपत्तेः प्रकृतिशब्दस्य करणपरत्वमित्यर्थः । श्रुत्योर्दौर्बल्यप्राबल्यनिमित्ताभावान्न १३
प्रकृतिशब्दोऽन्यथयितुं शक्यत इत्याह न तुल्येति प्रकृतिश्रुत्यनुरोधेन पंचम्येव कस्मान्नान्यथा व्याख्यायत

इत्याह मायेति सावकाशनिरवकाशयोर्निरवकाशं बलवदिति न्यायात्प्रकृतिशब्दस्य च सावकाशत्वात्स एवान्यथा
क्रियत इत्याशंक्य सावकाशत्वमितरत्रापि तुल्यमित्याह निमित्तेपीति। एवं श्रुत्योः साम्यमभिधाय प्रकृतिश्रुतौ विशे
षमाह दृश्यमानेति। समानजातीययोरुपादानोपादेयभावनियमाच्चिदचितोश्च विजातीयत्वादुपादानोपादेय
भावानुपपत्तेर्मायाजगतोस्तथात्वनिश्चय इत्यर्थः। श्रुत्यंतरे मायायाः करणत्वप्रतिपत्तेः प्रकृतिशब्दोपि करणपर इ
ति शंकते इंद्र इति। न च मायाया एकत्वात्तत्र बहुत्ववचनानुपपत्तिरिति शंक्यं अवस्थाभेदापेक्षया तदुपपत्तेः न च विजा
ययोरात्मजगतोरुपादानोपादेयत्वानुपपत्तिः गोमयवृश्चिकादेर्विजातीयत्वेपि तथाभावदृष्टेरित्यर्थः। तृतीया
श्रवणमात्रमंगीकरोति सत्यमिति। तर्हि मायायाः करणत्वादनुपादानत्वमित्याशंक्याहात्मन इति आत्मनि वि
ज्ञाते सर्वमिदं विज्ञातं स्यात् तद्बहु स्यां प्रजायेयेत्याद्यनेकवाक्यपर्यालोचनयात्मन इति आत्मनि विज्ञाते सर्वमिदं वि
ज्ञातं स्यात् तद्बहु स्यां प्रजायेयेत्याद्यनेकवाक्यपर्यालोचनयात्मन उपादानत्वप्रतिपत्तेस्तर्हि बहूनां मायाया उपादान
त्वमित्याशयेन शंकते निरपेक्षेति बहूनां तंतूनां पटं प्रत्युपादानत्वं दृष्टं ततो विशेषमाह निरपेक्षेति यथा द्वयोः
तत्त्रयोरेकरज्जुद्रव्यं प्रत्युपादानत्वं तथा मायाब्रह्मणोरपि मिलितयोरुपादानत्वेन न किंचिदवद्यमस्तीत्याह त

तत्वप हीति। मायायाऽउपादानत्वप्रतिपादनफलमाहात इति। ब्रह्मोपादानवादिमते मायाशब्दः किं प्रज्ञायां वर्त्तते उत बुद्धौ
१४ आहो मंत्रादौ अथवान्यत्रेति विकल्प्याद्यं मुत्थापयति मायेति। मायाप्रज्ञातथा मे घेत्यत्र मायाशब्दप्रज्ञापरत्वेनाम्ना
नादित्यर्थः। तर्हि प्रज्ञायामेवाति व्याप्तिरित्याह सा चेति। प्रज्ञानं ब्रह्मेत्यादिश्रुतेरित्यर्थः। मायाशब्दस्य प्रज्ञापरत्व
मन्वयव्यतिरेकविरुद्धमित्याह नान्वयेति। कौ तावन्वयव्यतिरेकावित्यत्राह परिदृश्यमानेति। प्रतिपन्नोपाधि
वाधितेस्वप्रप्रपंचइत्यर्थः। इतोपि न मायाप्रत्यैक्षज्ञेत्याह लोकसंवेदनेति। विरोधं व्यनक्ति नहीति। प्रज्ञावति
मायाशब्दप्रयोगस्यानिंद्यमानत्वादपि न प्रज्ञापरत्वमित्याह गर्ह्येत इति। मायाशब्दस्य प्रज्ञापरत्वेपि न ब्रह्म
प्रज्ञापरत्वमित्याह बुद्धीति। मनो महान्मति ब्रह्मा पूर्बुद्धिः ख्यातिरीश्वरः॥ माया प्रज्ञेत्यत्र हैरण्यगर्भबु
द्धिपर्यायत्वेन मायाशब्दस्य स्मरणादित्यर्थः। मायाशब्दस्य बुद्धौ रूढिमात्यश्रित्योक्ते संप्रति तस्याम
प्युपचारात्प्रयोग इत्याह स्वप्नेति। इतोपि न ब्रह्मचैतन्यवाची मायाशब्द इत्याह पि चेति। द्वितीयमुत्था
पयति बुद्धिरेवेति। बुद्धेरनुपादानत्वाद्अत्रातिव्याप्तिरित्यभिसंधिः। किं बुद्धिशब्दः परिणामपरः राम
उत परिणामिपरः उभयथाप्यसंभव इत्याह न प्रकृतीति। कार्यत्वेनोभयोरपि प्रकृतित्वायोगात प्र १४

ह्रतिशब्दसमानाधिकृतस्य मायाशब्दस्यानृतबुद्धिपरत्वमित्यर्थः।तृतीयमनुवदति मंत्रेति।अन्वयव्यतिरेकाभ्यां निरोधाच्चमं
त्रादेर्मायाशब्दवाच्यत्वमित्याह नदृश्यमानेति तुरीयेपितदन्यतत्किं परमार्थसनूउतानिर्वचनीयमितिविकल्प्याद्यमव
तारयति तथापीति।मायाशक्तेः परमार्थत्वात शक्तितद्वतोश्चाभेदाच्चातिव्याप्तिरितिशंकार्थः।परमार्थत्वमविसिद्धमि
त्याह नासदिति।प्रागवस्थायाअनिर्वचनीयत्वेपि न तद्विषयो मायाशब्दः संभवेतद्दस्यश्वरथादिषु तत्प्रयोगादित्या
शंक्याह लोकलोकइति ज्ञाननिवर्त्यविद्यासामानाधिकरण्यादपि मायानसत्येत्याह तरत्यविद्यामिति।यस्मिन्परमे
श्वरे हृदि निवेशिते सति योगी कार्यरूपेण विततां मायां तरति तस्मै नम इति संबंधः।द्वितीयेतत्रातिव्याप्तिं दुर्वारेत्यप
संहरति तस्मादिति।अतिव्याप्तिशंकायां कः समाधिरित्याशंक्य मतभेदं दर्शयति त्रैविध्यमिति।अत्रेति जगत्कारण
इत्यर्थः त्रैविध्यमेवाह रज्ज्वादिति।संयुक्तं तद्द्वयं रज्ज्वा यथोपादानं तथा मायाविशिष्टं ब्रह्म कारणमित्येकः पक्षः।प
क्षांतरमाह देवात्मेति।स्वगुणैः सत्वरजस्तमोलक्षणैरित्यर्थः।पूर्वत्र मायाब्रह्मणोः समप्राधान्यमत्र तु ब्रह्मणः प्रा
धान्यं मायायाश्चोपसर्जनत्वमित्यर्थः।सकलजगदाकारेण विवर्त्तमानमायाधिष्ठानतत्त्वं ब्रह्म लक्षणमितिप
क्षांतरमाह जगदुपादानेति।एवंमतभेदमभिधायातिव्याप्तिं निरस्यति तत्रेति।भवतुपरतंत्रत्वं तत्स्य किमित्यत आ

तत्व ५ हतत्वेति। आश्रयोपाधीति आश्रयस्याज्ञानस्य सत्त्वादिहेतुरित्यर्थः। विवर्त्त इत्येतत्पदव्यावर्त्त्यां शंकामाह केचित्त्विति
।परिणामविवर्त्तयोर्भेदासिद्धेर्ब्रह्मविवर्त्तो विश्वं न परिणाम इति कथमुक्तमित्याशंक्याहैकस्येति। पूर्वस्येति। पूर्व
१५ स्वभावे स्थिते कथं तद्विपरीतरूपप्रतिभास इत्यत्राहासस्पुतिभवत्वेवं भेदस्ततः किमित्यत आह तेस्त्वेति। किंविव
र्त्तस्य प्रामाणिकत्वमुत परिणामस्येति विमर्शार्थः। परिणाम एव प्रामाणिक इत्याह स्पष्टीति। उक्तमर्थमेव विवि
त्यप्रवीहीत्याह सा खल्विति पूर्वरूपपरित्यागं विना रूपांतरापत्त्यभावं दर्शयितुं ज्ञानानंदेत्यादिविशेषणं। ज्ञानानं
दःस्वभावत्वात्त्यागानुपपत्तिरित्यभिप्रेत्य पक्षांतरमाहाहोस्विदिति। आद्यं प्रत्याह तत्वेति। वस्तुस्यादिति मुक्तौ का
र्यरूपाभावा — न्यताप्रसक्तिरिति शेषः। रूचकस्य स्वस्तिकाकारपरिणामव कार्यस्य ज्ञानाद्याकारेण परिणामा
त्वपून्यताप्रसक्तिरिति शंकते स्पष्टीति। स्वस्तिकस्यापि पुनरन्यथाभाववदानंदादिरूपस्यान्यथाभावे शंका दुःप
रिहारेत्याह। निर्मोक्षेति। अन्यथाभावस्य निमित्ताधीनत्वान्मुक्तौ च निमित्ताभावात्कथमन्यथात्वशंकेत्याशंक्य
परिणाम एवानुपपन्न इत्याहात आत्मेति द्वितीयमनुवदत्यथेति। तर्ह्यस्मदिष्टसिद्धिरित्याहैवं तर्हीति विवर्त्तवाच राम
कपदाभावात्कथं तत्प्रतिपादकत्वं श्रुतेरित्यत आह मुक्तिकेति तल्लक्षणत्वादिति पूर्वरूपापरित्यागेन रूपांतराप १५

त्रिलक्षणत्वाद्विवर्त्तस्येत्यर्थः। सृष्टिश्रुतेः सृष्टिमात्रोपक्षीणत्वान्न विवर्त्तसिद्धिरिति शंकते अथेति। वाक्यांतरपर्या
लोचनया सृष्टेर्विवर्त्तत्वनिश्चय इत्याह तथापीति। व्यवस्थितवाक्यैरिति कूटस्थत्वनित्यत्वनिरवयवत्वादिप्रतिपाद
कवाक्यैरित्यर्थः। निरवयवस्यापि परिणामित्वोपलंभाद्ब्रह्मणोपि परिणामित्वमिति शंकते योपीति सावयववन्मृदा
देवरेव परिणामोपलंभात्कथं निरवयवस्य परिणामस्तत्राह तथाहीति उक्तमर्थं सदृष्टांतमुपसंहरति तस्मादिति
परिणाम एव दुर्निरूप इत्याह स वक्तव्य इति किं पूर्वरूपे स्थिते परिणाम उत नष्टे न तावदाद्यः। तथाभावविरोधाद्द्वि
तीये पूर्वस्य नष्टत्वात्कस्य परिणामः किंच किं संमूर्छितावयवत्वं परिणाम आहोवस्त्वंतरसंयोगः उत परिस्पंदः
उत गुणानूगुणांतरोदयः किं वा पूर्वरूपानुषक्तद्रव्यांतरोदय इति वाच्यं आद्येपि किं स्वावयवानां संयोगापत्त्या
संमूर्छितावयवत्वमुतावयवांतरसंयोगेनेति विकल्पौघमयमप्यनूद्य दूषयति यदि तावदित्यादिना अस्मिन्
पक्षे अवयविनः परिणामासिद्धिश्चेत्याह न वावयवानामिति अवयवानां संयोगांतरेण संमूर्छितत्वं तदंतरेण परि
णामो निरूपयितुं न शक्यत इति योऽत्र नापरिणामावस्थांतरादिशब्दाः पर्याया इति द्रष्टव्यं द्वितीयतृतीयचतुर्थी त्रि
रस्यति न चेति प्रतिज्ञातार्थे हेतुमाह ब्रह्मणीति तत्रैव हेत्वंतरमाहाकाश इति पंचममुत्थाप्य यच्चेति उपादानका
रणं तच्छब्दार्थः हेत्विड्यांतरोदयदर्शनात्तस्य परिणामित्वेपि तदवयपरिणामः कीदृश इति विवेचनीयमित्याह त

तत्व ५ त्वं किमिति आशंक्य दूषयति नापि तूलचक्रे इति संयोगभेद एव परिणाम इत्याशंक्याह न चेति संयोगे सत्यप्याकाशे परि
१६ णामत्वप्रदर्शनादित्यर्थः। तूलचक्रस्यावयवपरिणामत्वमित्याशंक्याह न चेति। अवयवपरिणामस्य प्रत्यक्षतो
सिद्धावप्यनुपपत्त्या तत्कथनमिति शंकते अथेति। अनुपपत्तिं स्पष्टयति आश्रयेति। विकल्पासहत्वान्नैतदित्या
ह नैतत्सारमिति। किमाश्रितविकारमात्रस्याश्रयविकारपुरःसरत्वमुत विकारविशेषस्य नाद्य इत्याहावयवी
तिवस्तुतोऽवयवानामवयवत्वनधीनत्वेऽपि प्रतिभासमाश्रितत्वं तत्प्रमाणमित्युक्तं। द्वितीयमनुवदति अवयवीति
जन्मविनाशव्यतिरिक्तो योऽवयविविकारः स आश्रयविकारपुरःसर इत्यर्थः। घटावयवेषु घटत्वजातिसमवा
यं विनाप्यवयविनि तद्भाववत्परिणामोऽपि किं न स्यादित्याह नावयविनीति स[illegible]त्वाद्यैर्विनाप्यवयविनि तद्भा
अवयवावयविनोरभेदादवयविपरिणामावयवेष्वपि परिणाम आश्रयणीय इति शंकते नन्ववयवानामि
ति अन्यथोपपत्त्या दूषयति जातीति। दृष्टान्तं विघटयति नहीति। अनुपलब्धिविरुद्धश्चावयवपरिणाम इत्याह
न चेति। अदर्शनमेव स्पष्टयति नहीति। कार्यान्तरावभास इति पटसाध्यरज्जुद्रव्यलक्षणकार्यान्तरावभास इत्य राम
र्थः। अतत्वात्मनेति अन्यथाभावात्मकार्यात्मनेत्यर्थः। तंतूनां पटसाध्यरज्जुद्रव्येऽनुगमदर्शनात् रज्जुद्रव्यमेव १६

तत्कार्यमित्याशंक्यान्यथासिद्धमुक्तं स्मारयति पटकार्यइति। अवयवानां पृथक्परिणाममंगीकृत्य ब्रह्मणः परि
णामं दूषयति किं चेति। निरूपाधिकत्वमुपपादयति निरवयवेति। अवयविसंयोगस्यावयवसंयोगपुरःसरत्वा
दवयविपरिणामस्यावयवपरिणामपुरःसरत्वमित्युक्तमनुवदति यत्विति। अलक्तकनिष्ठारुणिम्नः स्फटिकम्
नवत्संयोगो वस्तुतोवयवसमवेतः सन्नवयविनि भातीत्युच्यते किं वा तत्र संयोगांतरमुत्पद्यत इति तत्राद्यं दूषय
ति तत्रापीति। द्वितीयं दूषयति नापीति। पटरज्वोः संयोगसमये वयवानामपि संयोगित्वं दृष्टमित्यत आहावयवा
नामिति। अवयवानामवयव्यनुगमेनहेतुना संयोगानुगमस्यान्यथासिद्धत्वादिति योजना। अवयविसंयो
गेवयवानामपि संयोगभानं संयोगानुगमस्तस्येत्यर्थः। संयोगस्याव्याप्यवृत्तित्वादवयवनिष्ठपवसंबंधइति
शंकते अवयवेष्विति कार्योदयान्यथानुपपत्त्या संयोगस्यावयविनिष्ठत्वमाश्रयणीयमित्याह नावयविस्यामि
ति। अवयविवृत्तित्वेबाधकं शंकतेऽवयविसमवायइति। अवयविन्यारंभकावयवातिरिक्तावयवास्वीकारादित्य
र्थः। अनुपपत्तिरत्रापि तुल्येत्याह तर्हीति। निरवयवे परिणामानुपपत्तिश्चेत्तर्हि ब्रह्मापि सावयवमेष्टव्यम
न्यथा तदात्मानं स्वयमकुरुतेत्यादेरसंभवादिति शंकते कथं पुनरिति विकल्पासहत्वाद्द्वैतदित्यारोप्यतइति। कि

तत्व प
१७

मवयवावयविनोरुभयोरपि स्वप्रकाशत्वमुतान्यतरस्य नाद्य इत्याहानवयवेति। द्वितीयं दूषयति अन्यतरस्येति श्रुतिवि
रोधादपि नाशाशिभाव इत्याह श्रुतिश्चेति। श्रोतत्वात्क्रियादिविधुरताया अभ्युपगमश्चेत्तर्हि तत एव क्रियादि
मत्त्वमप्येष्टव्यमिति शंकते नियंतृत्वादीति। यः पृथिवीमंतरो यमयतीति नियंतृत्वं श्रूयते पादोस्य विश्वा भूता
नि। चतुष्पाद्ब्रह्म षोडशकलमित्यादौ सावयवत्वमित्यर्थः। सक्रियत्वनिष्क्रियत्वप्रतिपादकश्रुत्योर्विरुद्धत्वाद्यथार्थ
त्वानुपपत्तेरेकस्यातात्विकविषयत्वमपरस्या तात्विकविषयत्वमिति व्यवस्थास्थेयेत्याह तर्हीति। तत्वं क्रियाव
त्वं अतत्वं क्रियाशून्यत्वं। मायया क्रियावत्त्वादि वस्तुतस्तद्वैपरीत्यमित्यर्थः। वैपरीत्यं किं न स्यादित्यत आह मा
यामिरिति। क्रियावत्त्वाद्यभ्युपगमे प्रयोजनाभावादितरत्र च प्रयोजनसंभवादपीत्थमेव व्यवस्थेत्याह चेतनस्ये
ति। इतोपि न परिणामः प्रतिपाद्यत इत्याह विपरीतस्वरूपेति। तत्सृष्ट्वा तदेवानुप्राविशदित्यत्र सर्गोत्तरकालं प्र
वेशः श्रूयते परिणामपक्षे सर्वरूपस्य नष्टत्वात्कस्य प्रवेशो निर्दिश्यतेत्यर्थः। योपि कश्चिदित्यारभ्येति सिद्धमित्यं
तः प्रक्षिप्त इति केचित्। पृथिव्याद्युत्पत्त्याद्यदर्शनात्पृथिव्यादिकारणत्वं लक्षणमित्युक्तेटीकायां तदनुपपन्नं राम
पृथिव्याद्यात्मकस्य घटादेरुत्पत्त्यादिदर्शनादित्याशंक्य तात्पर्यमाह नचेति तर्हि भौतिककारणत्वं लक्षणमि ७

त्यत्राह भौतिकानामिति। भूतानाकार्यत्वाभावचोद्ये तत्रैव कार्यत्वं दर्शनीयं नान्यत्रेत्याशंक्य तात्पर्यमाहोत्पत
इत्यादेरिति पृथिवी जलं च विनाशवती पृथिवीत्वात्तदेकदेशपृथिवीवदेवमवादिषु प्रयोगो द्रष्टव्यः। हेतुं सा
धयितुं बुद्धिगोचरत्वादित्युक्तं। प्रत्यनुमानविरोधं शंकते ननु प्रत्यनुमानमिति। साध्यविकलो दृष्टांत इत्याशं
क्याहाकाश इति। घटादिव्यावृत्त्यर्थं निरवयवेत्युक्तं। गुणादिव्यावृत्त्यर्थं द्रव्यत्वादिति। आकाशनित्यत्वानुमानस्य
श्रुतिविरुद्धत्वं साधनवैकल्यं च दृष्टांतस्य स्पष्टमित्युपेक्ष्य दूषणांतरमाह सत्यमिति। प्रत्यनुमानसद्भावेंऽगीकृ
तश्चेत्तर्हि उत्पत्त्यादिकारणं न सिध्यतीत्याशंक्याह महाभूतत्वादिति। सामान्यविशेषविषययोः शास्त्रयोर्विशेषशास्त्रं
वलीयः सामान्यशास्त्रं दुर्वलमिति न्यायात् विशेषविषयोत्पत्त्याद्यनुमानस्य वलीयस्त्वं। तथा चोक्तं भट्टमिश्रैः
ः। प्रसिद्धावयवं यस्याद्विशेषे च प्रतिष्ठितं। तत्साध्यांगक सामान्यदृष्टाद्वलवत्तरं। वाध्यं सामान्यशास्त्रस्य वि
शेषविषयाद्यथा। अनुमानांतरैरेवमनुमानस्य वाधनमिति। अस्य जगत इत्युत्तरग्रंथे नपौनरुक्त्यं निरस्य
तिनयथेति। अक्षरव्याख्यानकथनपरत्वेनायं ग्रंथ इत्याहास्येति। अस्य जगत इत्यनेन भाष्यं व्याचष्टे इत्यन्वयः
। अस्य जगत इत्यत्र नयपोक्तविशेषणस्येत्यादिभाष्याक्षरव्याख्यानं क्रियते तत्र तु तात्पर्यं कथ्यते इत्यपौनरुक्त्य

तत्व मित्यर्थः। परकल्पनाप्रतिपन्नौ तद्विसर्जनं सुकरमिति तत्कल्पनामाह नान्यत इति। सुखदुःखमोहात्मकमनुगतं
१८ सामान्यपदवेदनीयं यद्वस्तु सा प्रकृतिर्येषां ते तथोक्ताः। यद्यदन्वितं तत्तत्प्रकृतिकं इत्युक्ते संयोगान्वितघटादि
षुव्यभिचारस्तदर्थं नियमेनेति अनुमानांतरमाह तथेति। एकप्रकृतिकाइत्युक्ते ब्रह्मप्रकृतिकतयासिद्धसा
धनं तदर्थमविभक्तेति। संसृष्टत्वमविभक्तशब्देन विवक्षितमित्यर्थः। एतावत्युक्ते संसृष्टपरमाणुएकप्रकृति
कतयासिद्धसाध्यत्वं तदर्थमेकेति। परिमितत्वादनेकत्वाद्विकारत्वाच्चेति हेतुत्रयं। विवादाध्यासितं कार्यद्रव्यं
स्वपरिमाणादनुत्तरपरिमाणारब्धं कार्यद्रव्यत्वात्संमतवदिति विवक्षितं। संगस्यासमवायिकारणत्वं द
र्शयितुं संयोगसचिवेत्युक्तं। विजातीयस्यानारंभकत्वमाह समानजातीयेति। अनेकेषामारंभकत्वे नियममाह
नेकेति। कार्यगुणादिव्यावृत्त्यर्थं द्रव्यत्वादिति। नित्यद्रव्यव्यावृत्त्यर्थं कार्येति तथापि कथं परमाणुकारणवाद
स्तत्राह निरवयवेति। अनुपलभ्यमानपूर्वावस्थत्वादित्युक्ते आत्मनि व्यभिचारस्तदर्थं योगपत्वे सतीति। पौन
रुक्त्यं निरस्यति तत्र प्रथममिति। उत्तरत्र प्रमेयदूषणं कथ्यत इत्यपौनरुक्त्यं। प्रमाणदूषणप्रकारं पृच्छति क राम
थमिति। घटादयो बाह्यत्वेन सुखादयस्त्वांतरत्वेन व्यसिद्धिरित्यर्थः सुखाद्यात्मतायाः प्रामाणिकत्वादृष्टे दोष १८

लंभो विभ्रम इति शंकते स्यादेतदिति। स्वाभिव्यंजकोपाधौ तदाकारप्रतिभासहेतुत्वादितिहेत्वर्थः। असिद्धिनिरासार्थं स्वा
भिव्यंजकेति विशेषणं। प्रत्यक्षविरोधादनुमानमेव नोत्तिष्ठतीत्याह नांतर्वहिरिति। न च प्रत्यक्षस्य भ्रांतत्वाद्बाध
कत्वं शंक्यं बाधकप्रत्ययवैधुर्येण भ्रांतित्वं न च बाधकप्रत्यय उपलभ्यते न चास्मादनुमानाद्बाधः परस्पराश्रयप्रसंगा
दित्यर्थः। पक्षबाधकतर्कपराहतश्च हेतुरित्याह एकमिति। एकैकस्य च त्रयात्मकत्वेपि यद्युपलब्धिहेतोरदृष्टस्योद्बो
धस्तस्योपलंभो नेतरस्येति व्यवस्था मा शंक्याह संयोगसचिवेत्युक्तं। विजातीयस्यानारंभकत्वमाह समानजाती
येति। अनेकेषामारंभकत्वे नियममाह नानेनेति। कार्यगुणादिव्याप्त्यर्थं द्रव्यत्वादिति। नित्यद्रव्यव्यावृत्त्यर्थं का
र्येति तथापि कथं परमाणुकारणवादस्तत्राह निरवयवेति। अनुपलभ्यमानतत्त्वावस्थत्वादित्युक्ते आत्मनि व्यभिचा
रस्तदर्थं योग्यत्वे सतीति। पौनरुक्त्यं निरस्यतत्र प्रथममिति। उत्तरत्र प्रमेयदूषणं कथ्यत इत्यपौनरुक्त्यं। प्रमाणदू
षणप्रकारं दृष्टेति कथमिति। घटादयो बाह्यत्वेन सुखादयस्त्वांतरत्वेनेत्यसिद्धिरित्यर्थः। सुखाद्यात्मतया प्र
माणिकत्वाद्भेदोपलंभो विभ्रम इति शंकते स्यादेतदिति। स्वाभिव्यंजकोपाधौ तदाकारप्रतिभासहेतुत्वादितिहेत्वर्थः
। असिद्धिनिरासार्थं स्वाभिव्यंजकेति विशेषणं। प्रत्यक्षविरोधादनुमानमेव नोत्तिष्ठतीत्याह नांतर्वहिरिति। न च प्र

तत्वप १८ त्यक्षस्य भ्रांतत्वाद्बाधकत्वं शंक्यं बाधकप्रत्ययवैघं भ्रांतित्वं न च बाधकप्रत्यय उपलभ्यते न चास्मादनुमानाद्बाधः
परस्पराश्रयप्रसंगादित्यर्थः। पक्षे बाधकतर्कपराहतश्च हेतुरित्याहैकमिति। एकैकस्य च त्रयात्मकत्वेपि यदुपल
ब्धिहेतोरदृष्टस्योद्बोधस्तस्योपलंभो नेतरस्येति व्यवस्थामाशंक्याहादृष्टेनेति वस्तुनि प्रतीयमानेपि तदभिव्यंसु
त्वाघदृष्टाभावान्नोपलभ्यत इति न वक्तव्यं वस्तुनोप्यनुपलंभापातादृष्टव्यतिरिक्तपुष्कलकारणसत्वदृष्टाभावा
पराधेन कार्याभावादर्शनात् नादृष्टस्य नियामकत्वमित्यर्थः। द्वितीयानुमानस्य दुष्टत्वे सिद्धे तदर्चितत्वादिति हे
तोरसिद्धिस्तदवस्थैत्याह तदितिगुणसामान्यैरिति नीलपीतादिगुणैर्घटत्वादिसामान्यैश्चेत्यर्थः। परिमितत्वादित्य
त्र किं वस्तुतः परिमितत्वं आहोदेशतउत कालतो नाद्य इत्याह तत्रापीति। द्वितीयतृतीयौ दूषयति देशकालेति। द्वया
दिषु परिमितत्वं वर्त्तते न चैकप्रकृतिकत्वं तैर्घटस्य मृदुपादानत्वात् हिमकरकादेश्चोदकोपादानत्वात्। द्वितीय
तृतीयहेतोरप्यत्रैव व्यभिचारः स्पष्ट इत्युपेक्षितं। दुकूलयोरत्यावयविन्वान्तरज्जुद्रव्यारंभकत्वं किंतु संयोगमात्रमि
तिनानैकांतिकत्वमिति चन्मैवं पटस्यापितंतुसंयोगमात्रत्वं न कार्यात्मत्वमित्यपिप्रसक्तेरित्यर्थः। आत्मनि सिद्धसा राम
ध्यत्वं निराकरोति कार्यैति। गुणादिकं व्यावर्त्तयति द्रव्यमिति। प्रचयात्मकत्वात्सावयवत्वादित्यर्थः। यत्संयोगपुरः १८

सरत्वं पूर्वपक्षिणोच्यते तस्य तस्य प्रतिषिध्यमानत्वाच्चादिक्कालादिसंयोगपुरःसरत्वाभावेन सिद्धसाध्यमित्यर्थः।
सर्वकार्यं अभावपुरःसरं इत्यत्र किं घटादेरपि धर्मित्वमुत तद्व्यतिरिक्तस्येति विकल्पाद्यं प्रत्याह शून्यानुमान इति। नापि
द्वितीयः क्वचित्सकारणत्वेइ तत्रापि तदनुमानसंभवादित्यर्थः प्रधानादेरचेतनत्वादित्यादौ चेतनाचेतनकार
णवादस्य निरस्तत्वात्पौनरुक्त्यमित्याशंक्याह इदानीमिति। चेतनकारणतायाः सिद्धांतिनोपि संमतत्वात्कथं निर
स्तनमित्याशंक्याह माभूदिति। परिछिन्नत्वादित्यत्र किं देशतः परिछेन्नत्वं विवक्षितं उत कालत आहोवस्तुतः प्रथ
मद्वितीययोर्हेत्वसिद्धिः नापि तृतीयः वस्तुतः परिछिन्नस्याप्यधिष्ठातृत्वोपपत्तेः अतश्च परिछिन्नत्वादित्येतद
संगतमित्याशंक्या तात्पर्यमाहायमर्थ इति। इतोपि नाधिष्ठात्रीश्वरवादो युक्त इत्याह घटादिष्विति। विवा
दाध्यासितं द्विकर्तृकं कार्यत्वात् घटादिवत् न च जीवेश्वरकर्तृद्वयांगीकारादिष्टापत्तिरित्यपि वाच्यं घटादौ जीवे
श्वरकर्तृत्वस्य तदतिरिक्तकुलालकर्तृत्वस्य च दृष्टत्वात् सृष्ट्याद्यावपि कर्तृत्रयप्रसंगात् न चात्रोत्कर्षसमत्वं
शंक्यं अव्याप्तधर्मप्रसंजनस्योत्कर्षसमत्वान्नचात्र तथात्वं घटादेः कर्तृत्रयव्याप्तत्वादित्यर्थः निरुपाख्यत्वान्न
शून्यस्य कारणत्वमित्युक्तं तदनुपपन्नं निरुपाख्यकारणवादिनं प्रति निरुपाख्यत्वादिति हेत्वभिधानायोगादि

तत्व° त्याशंक्याह न चेति। यद्यदननुविहितं तत्तदुपादानं दृष्टं यथा देशो निरूपाख्यानन्वितत्वाच्च शून्योपादानत्वमित्यर्थः
२० । इतोपि न जगच्छून्योपादानत्वमित्यर्थः । मित्याह किं चेति। निरूपाख्यस्य कारणत्वे कर्मतत्फलतत्प्रमाणव्यवहारो
च्छेद इति संबंधः। तत्र हेतुमाह पूर्वकल्पस्येति। मा भूत्सजातीयकार्योत्पाद इति मत्वानं प्रत्याह विशिष्टेति। इतोपि
न निरूपाख्यकारणवाद इत्याह शब्दार्थेति। शब्दार्थसंबंध तद्व्यवहारिणां निरन्वयविनाशे प्रमाणव्यवहारो
च्छेद इति संबंधः तद्व्यवहारिणां सत्वमेव किं मानमित्यत्राह नाकस्येति मेरुपृष्ठादेरूपरीत्यर्थः। तं कालं तावंतं
कालं आकल्पमित्याद्यर्थः। ब्रह्मप्लुत इति वेदप्लुत इत्यर्थः च प्लुत इति पाठे विशङ्कावमापन्न इत्यर्थः। स्मरन्निति प्रा
क्तनशब्दार्थसंबंधव्यवहारं स्मरन्नित्यर्थः। निरन्वयविनाशेपि प्रमाणव्यवहारोच्छेदः कस्मादिति तत्राह कल्पा
तर इति प्राक्तनव्यवहारानुसंधानाभावेप्यपूर्व एव शब्दार्थसंबंधः संकेत्यत इति शंकां निरस्यत्यपूर्वेति प्रधा
नादीनां कारणत्वं नचेत् तर्हि स्वभावः कारणमिति शंकते अत्र स्वभावेति। कार्यस्य न कारणसापेक्षत्वं नियंतुं श राम
क्यते सामग्र्यां व्यभिचारादित्यर्थः विकल्पासहत्वात्स्वभाववादोपि न युक्ति सह इत्याह ननु स्वयमेवेति कर्तृक २०
र्मविरोधात्स्वस्य स्वनिमित्तत्वानुपपत्ते र्नाद्यो युज्यते। नांत्योपि कार्यस्यानुत्पत्तिप्रसंगादित्यभिसंधिः। अंतिमप

क्षमाप्तिरित्याह पूर्ववादी निर्निमित्तमिति निमित्तनिरपेक्षत्वे कार्यजन्माश्रयणे अतिप्रसंगः स्यादित्याह ननु तर्हि
ध्वंसस्येति न च युगपद्भावाभावप्रसंजनमिष्टमित्यपि शंक्यं विरोधात् प्रवृत्तिनिवृत्त्ययुक्तेश्चेत्यर्थः। विकल्प्यासहत्वा
त्प्रत्येकवादोपीत्याहो च्यत इति। किं सदसत्प्रसंजनमात्रमेतत् उत सहेतुकत्वं सिसाधयिषसि नाद्यो नुभवविरोधादि
त्यभिप्रेत्य द्वितीयं दूषयति कारणस्येति। द्वितीयं पक्षमादाय शंकते कालभेदेनेति। कालभेदस्य स्वाभाविकत्वा
त्पूर्वापरीभूतकालेऽक्रमापेक्षया कार्यजननं नरकालेपि चोद्यमवतरतीति तस्य नित्यत्वादित्यर्थः। कालस्य नित्य
त्वेपि तस्य पूर्वापरीभावः स्वाभाविकः उत सहेतुकः नाद्य इत्याह सकालेति। द्वितीयं प्रत्याह निमित्तांतरेति। न चान
वस्थाप्रसंजनेपि इष्टमित्यपि शंक्यं निमित्तभेदस्यानुभववाधितत्वादित्यर्थः। त्वत्पक्षेपि क्रमकार्योदयस्याक
स्मिकत्वमित्याशंक्य तत्रापि स्वभाव एव हेतुरित्याह तस्मादिति। एवं सोपपत्तिकं स्वभाववादमभिधाय तदुत्तर
त्वेनोत्तरग्रंथमवतारयति तत्राहेति। तैलाघर्षिनां देशादिनिमित्तापेक्षादर्शनान्न स्वभावतो जन्मेत्युक्तं तत्रेदं
विवेक्तव्यं किमसमर्थस्यान्यापेक्षा उत समर्थस्य आद्ये न सहकार्यपेक्षयापि कार्यकरत्वं शिलाशकलादेरुदका
दिसहकृतस्यापि कार्यकरत्वादर्शनात् द्वितीये सहकार्यपेक्षैवानुपपन्नेत्याशंक्य द्वितीयपक्षमादाय समाधत्ते

तत्व५ स्वतःसिद्धेति।किंच प्रतिज्ञातेर्थेऽहेत्वनुरूपन्यासपतेऽत न आद्ये निर्द्दुष्टकवादस्तुतिः।द्वितीये प्रतिज्ञातार्थासिद्धिरिति द्रष्टव्यं
।प्रधानादीनां कारणत्वासंभवात् यतो वेत्यादिवाक्यालोचनया ईश्वरः कारणमित्युक्तं तदाक्षिपति नन्वनुमानेनेति
।विवादाध्यासितं कर्म प्रयत्नाधारजं कर्मत्वात् संप्रतिपन्नवदित्यनुमानादीश्वरसिद्धेः कृतं वाक्येनेत्यर्थः।युक्त्यनु
२१ मानयोर्भेदासिद्धेर्नायं विभागः साधुरित्यत्राह युक्तिरिति।एतदेकत इत्यत आह व्याप्तीति।व्याप्त्याभासादनुपपत्त्या
भासादुदाहरणमात्रदृष्टेश्च संभावनाबुद्धिजन्मेत्यर्थः।अस्त्वेवं भेदः प्रकृते तु किमायातमित्यत्राह तत्रेति।तर्हि लौ
कवेदयोरुदाहरणादिदर्शनं दृष्टेत्याशंक्याह किंत्विति।कथं तर्ह्यनुमानगीस्तत्राह तत्राज्ञानादिति।अनुमान
स्वरूपे ज्ञाते तस्याभासत्वं ज्ञायते तदेव कथमिति शंकते किं तदिति व्याप्त्यर्थंदर्शितंमिति नात्रोच्यते।आद्यानुमानस्या
निश्चायकत्वं तावदाह तत्र वैशेषिकेति।प्रासादादेर्बुद्धिकर्तृत्वं तावत् दृश्यते न तथा तद्वज्जगतोपि बुद्धिकर्तृत्वं स्यात्।
।नच लाघवादेककर्तृत्वं तगजःशंकां निमित्तोपादानैक्यस्यापि तत एव प्रसक्तेरित्यर्थः।यथाश्रुतसाध्यांगीकारेदृ
ष्टांतस्य साध्यवैकल्यं स्यात् तत्तज्ज्ञानादिशक्तयः क्वचित्काष्ठां प्राप्ताः सातिशयत्वात् संमतवदिति विवक्षितं तत्र किं काष्ठा राम
प्राप्तिमात्रमनुमीयते उत पराकाष्ठाप्राप्तिरिति विकल्प्य तत्राद्यस्यावदसंगत इत्याह योगानुमान इति।पराकाष्ठाप्रा २१

ऽनुमाने दूषणमाह सर्वविषयेति। सेवादिफलस्य शरीरादिमद्द्वारपूर्वकत्वं दृष्टमिति सर्वस्यापि कर्मफलस्य शरी
रादिमद्द्वारपूर्वकत्वलक्षणपक्षबाधकतर्कपराहेतो हेतुरित्याह नैय्यायिकेति। कथं तर्हि त्वन्मतेपि युक्तीनां सर्वसा
धकत्वं तत्राह श्रुतिप्रतिपन्नेति। फलितं दर्शयति इत्यज्ञानादिति। एतत्सर्वं हृद्यभिसंधायोक्तमनुपपंत इति। ईश्वरसाधन
वाक्यप्रतिपत्तेः कथं तदाक्षेपस्तार्किकाणामिति शंकते नन्तु वाक्येष्विति। वाक्यस्वरूपं न निराक्रियते किंतु तत्प्रामाण्यं इत्या
नुमानेति। संभावनाबुद्धिहेतुत्वेनानुमानोपन्यासांगीकारात्रन्विहापीति वोधमनर्थकमित्याशंक्य तात्पर्यमाह ननु
स्त्वइति वाक्यानामप्यनुमानरूपत्वाद्वेदांतवाक्यग्रथनार्थत्वादित्येतन्नानिष्टमित्याशंक्य प्रतिज्ञाद्यवयवानुपल
ब्धेर्नानुमानत्वमित्यभिप्रायेणाह परिहरतीति। वेदांतानामनुमानसिद्धानुवादकत्वं यदुक्तं तदप्यसंगतमित्याह
किंचेति। अनुमानादिति। आगमासहकृतादित्यर्थः। भूतस्य प्रमाणांतरगम्यत्वाद्ब्रह्मणोपि प्रमाणांतरगम्यत्वमत्रा
हनचेति। इंद्रियाद्यगम्यत्वेन विशेषतो दृष्टस्याप्रसरात्सामान्यतोदृष्टस्य च कारणमात्रविषयत्वाद्विशिष्टब्रह्माग
मैकगम्यमित्यर्थः॥४॥ ब्रह्मावगतेरनुमानानिर्वृत्तत्वे नसूत्रणमनर्थकमिति शंकते नतर्हीति। अनुमानस्य स्वातं
त्र्यमेव निषिध्यते न सहकारित्वमित्याह तत्राहेति। श्रुत्यादिस्वरूपमाह श्रुतिरिति। श्राद्वः श्रुतिरित्युक्ते वाक्ये व्यपि

तत्वप चारस्तदर्थं पदांतरेति। पदांतरानपेक्षइत्युक्ते धूमस्यापि श्रुतित्वं स्यात्तदर्थमाह शब्द इति। ऐंद्र्या गार्हपत्यमुपतिष्ठ
२२ तइत्यत्र तृतीयाश्रुत्या कदाचनस्तरीरसीत्यैंद्र्याः गार्हपत्योपस्थाने विनियोगः प्रतीयत इति श्रुतेर्विनियोग इत्य
र्थः। लिंगस्वरूपं दर्शयति लिंगमिति। श्रुतसामर्थ्यं लिंगमित्यावत्। वर्हिर्देवसदनं दामीत्यत्र वर्हिर्लवनलक्ष
णार्थस्य श्रुतिप्रतिपन्नस्यानुपपत्वात् प्रकाशनसमर्था। याश्च चो वर्हिर्लवने सद्धाणार्थस्य श्रुतिप्रतिपन्न
स्यानुपपन्नत्वात् प्रकाशनसमर्थायाः विनियोगः प्रतीयते इति श्रुतिकल्पनया लिंगस्य विनियोजकत्वमित्यर्थः
। वाक्यस्वरूपमाहानेकेति। लिंगव्यावृत्त्यर्थमनेकेति विशेषणं। आकांक्षाद्यनुरोधेन पदानां विशिष्टैकार्थप्रतिपा
दकं वाक्यमित्यर्थः। इमामगृभ्णन्रशनामृतस्येति रशनादानमात्रे विनियोगप्राप्तौ इमामगृभ्णन्रशनामृ
तस्येत्यश्वाभिधानीमादत्त इति ब्राह्मणवाक्यादश्वरशनामंत्रस्याश्वरसनादाने विनियोगः प्रतीयत इत्यर्थः। प्रक
रणस्वरूपमाह वाक्यद्वयेति। प्रतिपन्नवाक्यभावानां पदानां वाक्यांतराभिसंबंधः प्रकरणमिति यावत्। वाक्यां
तराभिसंबंधे हेतुमाह आरभ्याधीतेति। प्रयोजनाकांक्षया संबंध इत्यर्थः। दर्शपूर्णमासाभ्यामिति तृतीयाश्रुत्या राम
दर्शपूर्णमासयोः करणत्वे प्रतिपन्ने करणस्येति कर्तव्यताकांक्षायां प्रधानवाक्यस्य समिदादिसंबंधः समि २२

दादिसंबंधः। समिदादिवाक्यस्य च फलविधुरस्य तदाकांक्षायां प्रधानवाक्येन संबंध इति प्रकरणाद्विनियोग इत्यर्थः। स्था
नस्वरूपमाह क्रमवर्त्तिनामिति। दर्शपूर्णमासप्रकरणे कानिचित्कर्माणि उपांशुयाजप्रभृतीनि दब्धिरसीत्यादयः
केचन मंत्राश्च समाम्नायंते। तत्र यस्य कर्मणः क्रमेण यो मंत्रः समाम्नातः तेन तस्य संबंध इति स्थानक्रमप्रमाणा
न्मंत्राणां कर्मविशेषस्य च संबंधः। तथा काम्येष्टीनां याज्यानुवाक्यानां च मंत्राणां क्रमात्संबंध इत्यर्थः। समाख्यास्व
रूपमाह संज्ञेति। यथाध्वर्यवसंज्ञानां मंत्राणां आध्वर्यवसंज्ञे कर्मणि संज्ञासाम्येन विनियोग इति। धर्मेऽनुभवाद्य
पेक्षावद्ब्रह्मण्यपि नपेक्षां शंकते ननु शाब्देनेति। असंभवी चानुभव इत्याह न च शाब्देति। धर्मस्य शब्दप्रमेयस्य यथानुभवा
योग्यत्वं तद्वदस्यापीत्यर्थः। वैषम्येणोत्तरयति तत्राहेति। सिद्धत्वेनात्र ब्रह्मणोऽनुभवयोग्यत्वादनुभवं विना पुरुषाकां
क्षाऽनिवृत्तेश्चानुभवपर्यंत इत्यर्थः। अनुभवमंतरेणाप्याकांक्षाया निवृत्तिर्दृष्टा धर्मजिज्ञासायां तद्वदत्रापीति साम्य
माशंक्य अनुष्ठानद्वारा धर्मस्य पुमर्थसाधनत्वाद्ब्रह्मणस्य च ज्ञानमात्रेण संभवत्रानुभवापेक्षा अत्र तु नैवं
तद्वैपरीत्यादित्येवंरूपाक्षेपपरिहारो स्पष्टावित्याह नन्विति धर्मेति। कर्त्तव्यविषय इत्यत्र हेतुगर्भं विशेषणमुक्त
मज्ञानानः शंकते किमिति धर्मस्येति। अभिसंधिं विवृणोति धर्मस्येति। साध्यैकस्वभावत्वाद्धर्मस्य साध्यताकर्तृसमयो

तत्वप गपत्वमित्यर्थः॥ज्ञानमात्रादेव धर्मेऽश्वद्रेयनिश्रेयसलक्षणपुरुषार्थसिद्धेस्तत्साक्षात्करणं वृथेति शंकते ननु सि
२३ द्धस्वभावस्येति। साक्षात्कारमंतरेणानुष्ठानसंभवाद्धर्मसाक्षात्कारस्यानपेक्षत्वमिह तु अपरोक्षभ्रमस्यापरोक्षज्ञा
नं विना निवृत्त्यनुपपत्तेस्तद्देष्टव्यमित्याह तत्राहेति। कर्मज्ञानकांडयोः कार्यपरत्वसाम्यादनुभवादावपि साम्यमिति
शंकते नन्वेदेति। कार्यपरत्वं असिद्धमित्याह। अनिष्टपर्यवसायित्वं दर्शयितुं प्रश्नमुत्थापयति अस्त्विति। व्यव
स्थितविकल्पाद्वैषम्यमाह इतीद्वेति। उत्सर्गापवादयोरुदाहरणांतरमाहाहवनीय इति। आहवनीये जुहोती
त्युत्सर्गः। पदे जुहोतीत्यपवादः। अश्वस्य पदे विन्यासदेशे जुहोतीत्यर्थः। प्रकृतेरिति प्राकृतो कृतानां कुशमयव
र्हिषां प्रकृतिवद्विकृतिः कर्त्तव्येत्यतिदिष्टानां विकृतावुपदिष्टशरमयवर्हिर्भिर्विरोधः शरमयवर्हिषां निरवका
शत्वादितरेषां प्रकृतौ सावकाशत्वादित्यर्थः। अभ्युच्चयमुदाहरति पंचेति। विध्यादिप्रसक्तेरनिष्टपर्यवसायि
त्वं दर्शयितुं प्रश्नमुत्थापयति अस्त्वेवमिति। सिद्धत्वाद्वैवमित्याह नेत्याहेति पौनरुक्त्यं व्यावर्त्तयति तदेवेति वि राम
चारमंतरेण संभावनानिवृत्त्यसंभवात्कथं विचारानर्थक्यं इत्याशंक्यानुमानांतर्भूतत्वाद्धा कथं न पृथग्विचार २३
णीयमित्याह पुनरनुमानवादिन इति। प्रतिज्ञाद्यप्रतिपत्ते कथमनुमानस्त्ववकत्वं तत्रस्येति शंकते नन्वनु

मानेति। सद्रूपेणाब्रह्मणो मानांतरं विषयत्वान्नेंद्रियाविषयत्वइत्यादिग्रंथोऽस्य समंजस इत्याशंक्याह ज्ञानानंदे
ति। युक्तीनां ब्रह्मविषयत्वाभावान्नत्र कथं संभावनाबुद्धिहेतुत्वमभिहितमित्याशंक्याह अत इत्यादेरिति। सामा
न्यद्वारेण संभावनाबुद्धिहेतुत्वप्रकारं पृच्छति कथमिति। तत्प्रकारमेवाह तद्गदिति। किं च ब्रह्मणः प्रत्यक्षे चासा
धारणस्य च पदार्थतामाहेत्याह किंपुनरिति। ब्रह्मणस्तावदत्रपदार्थत्वमगृहीतसंबंधत्वान्नापि वाक्यार्थत्वं पदा
र्थस्यैव पदार्थांतरसंसृष्टत्वेन वाक्यार्थत्वाद्ब्रह्मणश्चापदार्थत्वे नैवमित्याक्षेपग्रंथार्थः। उक्तचोद्यस्यैषामित्या
दिनाऽपरिहारात्प्रतिवचनस्य प्रश्नानुसारित्वमाशंक्याह येषामिति। किं ब्रह्मपदार्थस्य विशेषतोऽप्रसिद्धत्वमुत
सामान्यत इति विकल्पाद्यमंगीकरोति सत्यज्ञानेति। द्वितीयं दूषयति बृहत्वमात्रस्येति। संनिहितपदार्थसंसर्ग
सामर्थ्यादिति सत्यज्ञानादिपदार्थसंसर्गसामर्थ्यादित्यर्थः। प्रमाणांतरप्रसिद्धस्य गांधर्वत्वादेर्लक्षकत्वं दृष्टं
तथा च सत्यज्ञानानंदादेरपि लक्षकत्वात्प्रमाणांतरसिद्धत्वं वक्तव्यं तच्च सत्यादिकं वाक्यं न प्रमाण इत्याशंक्या
हार्थादिति प्रतिपन्नं सत्यादिकं सकलानात्मवर्गाद्ब्रह्मणि व्यावृत्तबुद्धिं जनयतीति प्रमाणांतरागोचरत्वेपि सत्या
देर्लक्षकत्वं युज्यत इत्यर्थः। येषां वेदानां वाक्यानामित्यादि टीकामाक्षिपति ननु स्वाध्याये ति। अग्निहोत्रं जुहोति यवा

तत्व गुंपवतीत्यादौ पाठक्रमस्याप्रयोजकत्वादित्यर्थः। समिधो यजतीत्यादौ पाठक्रमस्य प्रयोजकत्वं दृष्टमित्याशं
२४ क्य प्रस्तुते वैषम्यमाह प्रसिद्धेति। तथा च स्वाध्याय पाठक्रमेण भृगुर्वै वारुणिरित्यतो वा इमानीत्यादिवाक्यस्य ब्र
ह्मप्रतिपादकत्वं भाष्यकृतोदाहृतं तत्तद्व्याख्यानं चासमंजसमितीति शब्दार्थः। प्रसिद्धवदनुवादेनाप्रसिद्ध
प्रतिपाद्यत इत्येतदंगीकरोति सत्यमिति। तर्हि भाष्यटीकयोरनुपपत्तिरत्राह अधिकारीति। मुमुक्षुणा ब्रह्मज्ञा
नं कर्तव्यमित्युक्ते किं तद्ब्रह्मेत्याकांक्षायां तल्लक्षणोक्तेरवसरः तत्श्चाकांक्षाक्रमेण भृगुर्वा इत्यादिवाक्यं प्र
थममेव विचारितं यतो वा इत्यादिवाक्यमनंतरमित्यर्थः। यद्यपी नाम अनेकत्वाल्लाघुपादानत्वदर्शनाद्य जगत्कारणं
तद्ब्रह्मेति प्रतिपत्तुमशोशक्यं व्याघातादिति शंकते ननु जगत्कारणइति। अनवच्छिन्नस्य ब्रह्मशब्दार्थत्वात्कारण
स्य च व्यावृत्तत्वाद्व्याघात इत्यर्थः। एकग्रंथ्यपशंकां निरस्यति परिहरतीति प्रसिद्धानुवादेनाप्रसिद्धं प्रतिपाद्यत इ
ति न्यायाद्यतो वा इत्यादिवाक्यस्य कारणप्रतिपादकस्यानुवादकत्वं तथा च कथं प्रमापकत्वाभिधानमित्याशं
क्याह जगत्कारणेति जगत्कारणमात्रानुवादेपि तस्यैकत्वं प्रमीयत इति संबंधः। अपिरवधारणे प्रमीयत एवेति राम २४
। यतो वा इत्येकवचननिर्देशान्नकारणैकत्वं निश्चित्य तं शाकां तसिल्प्रत्ययस्य बहुत्वैकत्वसाधारणत्वात् इत्याशंक्या

रूनानात्वेति। येन जाता तानि जीवंतीति वाक्यशेषात् न सिद्धप्रत्यक्षस्यैकत्वविषयत्वं निर्द्धार्यत इत्यर्थः। यच्छब्दस्य
प्रसिद्धानुवादित्वाद्ब्रह्मैकत्वे प्रमितिहेतुत्वमिति शंकते न च्चनुवाद इति। किं प्रत्यक्षार्थस्यैकत्वस्यानूद्यमानत्वेउ
त कारणमात्रस्येति विकल्पाद्यं दूषयति न जगत्कारणेति द्वितीयं। प्रत्याहानुवादेति प्रकृत्या कारणमनूद्य प्रत्य
येन तस्यैकत्वं प्रमीयत इत्यर्थः। सामर्थ्यमेवाहान्यथेति। अनवच्छिन्नं ब्रह्म निरूपयितुं जगत्कारणत्वलक्षणमनूदि
तं इतरथा शेषासिद्धेरनुवादस्य नैष्फल्यं स्यादित्यर्थः। एकत्वं ब्रह्मस्वरूपं चेत्सुमेयं न प्रमेयं वाक्यभेदप्रसंगादिति
शंकते न चैकत्वे इति। स्वतंत्रस्यार्थद्वयस्याप्रमेयत्वाद्वैतदित्याह नैकत्वस्येति। यज्जगज्जन्मादिकारणं तदेक
मित्यवांतरवाक्येन प्रतिपाद्यं यदेकं कारणं तत्सत्यानंदरूपमिति प्रतिपादनान्न वाक्यभेद इति वाक्यार्थः। विशे
तरेण वाक्यभेदाभाव माहाथवेति। एकत्वस्य धर्मित्वात्कथं लक्षणांतर्गतत्वमित्याशंक्याह तथाहीति। भेदाभावोपल
क्षितं स्वरूपमेकमित्युच्यत इत्यर्थः। ननु तथापि तद्ब्रह्मेति कथं प्रधानस्यापि तादृक्त्वादिति शंकते ततइति। ईक्ष
णपूर्वकं स्रष्टृत्वश्रवणात्कारणस्य चेतनत्वं सर्वेक्षितृत्वाच्च सर्वज्ञत्वमित्याशयेनाह तदाहेति। ब्रह्मशब्दप्रयोग
मात्रेण कथं जगत्कारणस्यानवच्छिन्नत्वनिश्चयः संज्ञासंज्ञिसंबंधपरत्वाद्ब्रह्मशब्दप्रयोगस्येत्याशंक्याह न संज्ञे

त्रा३

तत्वप तिसंज्ञासंज्ञिसंबंधप्रतिपादनेफलाभावादित्यर्थः। किंपुरं तर्हीदं वचनमित्याशंक्याह किंत्वर्थेति उपक्रमादिनाका
२५ रणस्यानवच्छिन्नत्वप्रतिपत्तेर्नसंज्ञामात्रत्वं ब्रह्मपदस्येत्यर्थः। ब्रह्मशब्दादनवच्छिन्नप्रतिपत्तेःकथमसंज्ञा
त्वमित्यैहार्थिकइति। पुनस्तदित्यादेरयमर्थः। इतोपिप्रधानादिविलक्षणपरं लक्षणवाक्यमित्याह पुनरिति। त
द्विजिज्ञासस्वेत्यत्रजिज्ञास्यत्वोपदेशादित्यध्याहारः। जगत्कारणस्यजिज्ञास्यत्वोपदेशादनवच्छिन्नस्वभावं ज
गत्कारणमित्यर्थः। ब्रह्मशब्दप्रयोगोप्यमुमेवार्थं गमयतीत्याह ब्रूयादिति। तत्पदेन जगत्कारणमनूद्य ब्रह्मेति
जगत्कारणे ब्रह्मपदप्रयोगादित्यर्थः। एतावता कथं विलक्षणप्रतिपत्तिस्तत्राह हृहहत्यर्थेति। अस्तितावद्ब्रह्मे
त्यत्रसर्वज्ञत्वादेरपिब्रह्मपदात्प्रतिपत्तिरन्यथाभिन्नत्वानवच्छिन्नमात्रप्रतिपत्तिरुच्यतइतिविरोधस्तत्राहैक
मिति। अनवच्छिन्नशब्दस्योपलक्षणार्थत्वान्नविरोधइत्यर्थः। सर्वज्ञत्वादेस्स्वरूपलक्षणत्वासंभवादन्यत्स्वरूप
लक्षणं वक्तव्यं नचनिरूपयितुंशक्यतइत्याह ननुनिरुपाधिकेति। सर्वज्ञत्वादेः सप्रतियोगित्वान्नस्वरूपमित्य
र्थः। ब्रह्मरत्वंस्वरूपलक्षणमितिशंकतेब्रह्मेति। दृहत्वस्यधर्मिसापेक्षत्वादन्यद्धर्मिस्वरूपंवक्तव्यमित्याह नद्दृह राम
त्येति। निरुपाधिर्बृहदिति निरपेक्षइत्यर्थः। स्वरूपलक्षणं तरमाशंकते सच्छब्देति। सच्छब्दस्यमहासामान्यवाचि २५

त्वात्तत्पर्यवसानायव्यक्तिस्वरूपापेक्षणात्तद्वक्तव्यमित्याहनमहासामान्येतिविज्ञानव्यक्तिर्महासामान्यव्यंजिकेति
शंकतेविज्ञानमेवेति।सुखदुःखादीनामपिज्ञानभेदत्वेनगुरुणामप्यनुज्ञातत्वात्स्वज्ञानत्वस्यमहासामान्यत्वंततश्च
तद्व्यंजकंवक्तव्यमित्याहनतस्येति।आनंदस्यसर्वज्ञत्वादिधर्मव्यक्तित्वात्तेनतद्बोधमित्याहतदाहेति।आनंदाद्यैवेत्य
त्रानंदस्यकारणत्वंप्रतीयतेनब्रह्मस्वरूपमितिशंकायामाहानंदएवेति।निरपेक्षोपादानद्वयानुपपत्त्यानंदोब्रह्मै
वेत्यर्थः।श्रुतितोप्यानंदोब्रह्मेत्याहतथाहीति।आनंदस्यब्रह्मस्वरूपत्वेज्ञानस्यगुणत्वमाश्रयणीयंस्वरूपद्वयानुपप
त्तेरितिशंकतेविज्ञानमिति।ज्ञानानंदयोरितरेतरमभेदात्ज्ञानस्यस्वरूपत्वंयुक्तमितिप्रतिपादयितुंविचारमारभते
किंविज्ञानेतीत्यतोपिनगुणगुणिभावनिबंधनंसामानाधिकरण्यमित्याहगुणस्येति।गुणगुणिनोर्भिन्नत्वेघट
पटादिवद्गुणगुणिभावाभावः।अनन्यत्वेघटंप्रतिघटस्येवगुणगुणिभावासंभवः।अन्यत्वानन्यत्वंतुदुर्निरूपमि
त्यर्थः।निर्गुणत्वमुक्तमसहमानःशंकतेऽत्रसर्वेति।द्रव्यस्यगुणवत्त्वनियमादितरथाद्रव्यत्वहानिः।तथाचप्रयो
गः।ब्रह्मगुणवद्द्रव्यत्वात्संमतवदित्यर्थः।असिद्धौनयतिमाभूदिति।प्रमाणाभावोसिद्धइतिशंकतेसमवा
यिकारणत्वादितिब्रह्मद्रव्यंसमवायिकारणत्वात्संमतवदिति।असिद्धोहेतुरित्याहनारंभेति।यत्स्वसमवेततया।

तत्वप्र द्व्यारंभकं तत्समवायिकारणं ब्रह्मणोऽज्ञानानारंभकत्वादसिद्धिरित्यर्थः। इत्थं तस्माशंकते उपादानेति। अभिचारे
२६ णाद्दूषयति न गुणादीनामिति। ग्रहणकर्मत्वं ज्ञातत्वं। द्वित्वादिरादिशब्दार्थः। तार्किकमुद्रानंगीकारवादिनः शंका
मुद्भावयति न निर्गुणमिति। किं सर्वेषां गुणानां गुणवत्त्वमुतकेषांचित् आद्ये गुणानवस्था अनुपलब्धिविरोध
श्चेत्यभिप्रेत्य द्वितीयं दूषयति अंगुत्वगुणोऽपि सितितस्मात् द्वितीयः परिशिष्यत इत्याह तस्मादिति। भवत्वेवं ततः किमा
यातमित्यत आह तस्माद्विज्ञानेति इदं घट इत्यत्र घटव्यक्तेर्द्रव्यत्वालंबनत्ववद्विज्ञानत्वसामान्यालंबनमानंद इ
त्यर्थः। सर्वज्ञत्वादिधर्मकआनंदविशेषो ब्रह्मेति चेत्तर्हि तस्य गुणवत्त्वं तद्द्वितीयत्वं च दुर्वारमित्यत्राह तत्र सर्व
ज्ञेति। प्रपंचोपाधिकतयेति प्रपंचप्रतियोगिकतयेत्यर्थः। समारोपितसर्वज्ञत्वादिव्युदासेन चिन्मात्रस्य लक्ष्य
माणत्वान्नतेन सगुणत्वं सद्वितीयत्वं चेत्यर्थः। विज्ञानशब्दप्रवृत्तिनिमित्तस्य विज्ञानत्वस्य सत्वेऽद्वितीयत्वं व्याह
न्येत असत्वे। न विज्ञानशब्दप्रवृत्तिनिमित्तत्वं इत्याशंक्याह विज्ञानसामान्यमिति। न चानिर्वचनीयत्वेपि तस्य
विज्ञानशब्दप्रवृत्तिनिमित्तत्वाभावइत्यपि वाच्यं यदजतमसा साध्युक्तिरिति वाच्यमिथ्याभूतस्यापि शब्दप्रवृत्तिनि राम
मित्तत्वादित्यर्थः। विज्ञानशब्दवाच्यस्यानिर्वचनीयत्वेन ब्रह्मगुणत्वं ततश्च तत्सामानाधिकरण्यानुपपत्तिरि २६

स्तुक्तमनुभाषतेविज्ञानेतिखंडोगौरित्यादौगुणगुणिभावाभावेपियथासामानाधिकरण्यंतद्वदत्रापीत्याह
नधिज्ञानेति।औपाधिकोवायंविज्ञानशब्दइत्याहविज्ञानप्रयुक्तेति।सामानाधिकरण्यस्यजातिनिबंधनत्व
२७ मुक्तमाक्षिपतिसामान्यस्येति।किंगौणत्वमाभासत्वमुतसमारोपितत्वंनाद्यइत्याहनमुख्येतिद्वितीयेविज्ञान
त्वस्यसमारोपितत्वेप्यज्ञानविरोधित्वाल्लक्षणयाविज्ञानशब्दप्रयोगइत्याहतस्मादिति।नकेवलमेकस्यांमे
वशाखायांकारणानुवादेनब्रह्मप्रतिपाद्यते।किंतुसर्वत्रापीत्याहसर्वेष्वपीति॥ ॥इतिश्रीमत्परमहंस
परिव्राजकाचार्यखंडानुभूतिपूज्यपादशिष्येणाखंडानंदमुनिनाविरचितेविवरणतत्त्वदीपनेद्वितीयसू
त्रंसमाप्तं॥ ॥पंचमवर्णकंसमाप्तं॥ ॥श्रीराम॥ ॥ राम
२७

123
२

200

इति
"विवरणतत्वदीपनम्"